Pt Jageswar Mishra
Sanmatrak graha shanti prayog
समंत्रक ग्रहशान्ति प्रयोग
Sanskrit
Paper - Printed (Book form)
1958 Sambat (118 years old)
37 folio
8.7" x 5.2"
Complete

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0 Jangamwadi Math Collection. Digitized by eGangotri

97
NMM
KSA
03/04/2008

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

॥ हरिः ॥



॥ ॐ ॥

॥ अथसमंत्रकग्रहशान्तिप्रयोगप्रारम्भः ॥

एक्ट २५ सन् १८६७ के मुताबिक इस्की रजिष्टरी हुई हैं ग्रन्थकर्ता के सिवाय और किसी को छापने का अधिकार नहीं है छापने से राज दंडका भागी होगा।

CC-0 Jangamwadi Math Collection. Digitized by eGangotri

॥ विज्ञापन ॥

विदित हो कि यह ग्रन्थ अत्युत्तम है ऐसा कर्म काण्ड के विषय में दूसरा नहीं है जिस्के जानने से संपूर्ण कर्मकाण्ड में मनुष्य कुशल हो जाता है इस्को यथामति शुद्ध करके गायघाट निवासी मालवीय मिश्रोपनामक सुप्रसिद्ध कर्मकाण्डी पण्डित यागेश्वर जी के पुत्र पं० वैद्यनाथ जी तथा मालवीय पं० बालमुकुन्द कर्मकाण्डी जी के भ्रातृपुत्र पं० जगन्नाथ अपर नाम बचऊजीने श्री रुद्रकल्प द्रुम रुद्रदीपिका मदनरत्न हेमाद्रि बृहत्प्रयोगदर्पण संस्कार गणपत्यादि अनेक ग्रहयाग प्रयोगों के अनुसार संग्रह करके लोगोंके उपकारार्थ प्रकाशकिया जिस्को लेनाहो गायघाट पाटन दरवाजा पं० वैद्यनाथमालवीयकेनामसे पत्र भेज के मगा सक्ते हैं अथवा मैने जर बाबू सरयू प्रसादगायघाट बनारस बुकएजेन्सी वा भार्गवबुकडिपोचौकबनारससेमिलैंगी यह अपूर्व पुस्तक का दाम ॥) है।

सर्व साधारण ग्राहकों को भार्गव पुस्तकालय से बहुत सस्ती जिल्द बंधीं व विना जिल्द की संस्कृत व भाषा हर प्रकार की पुस्तकैं बम्बई मथुरा काशी कलकत्ता औैर २ जगह की छपी हुई मौजूद हैं पुस्तकैं व्यालूपेबुल द्वारा भी भेजी जाती हैं।

मैनेजर भार्गव पुस्तकालय चौक बनारस सिटी।

शुद्धाशुद्धपत्रम्।

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
निर्वतताम्	निवर्तताम्	१	५	वीरुध	वीरुधः	५	७	विघ्ननायकाः	विघ्नविनायकाः	१४	२
तेन्नोवातो	तन्नोवातो	१	८	गृहाणमेश्वर	गृहाणपरमेश्वर	६	३	लोञ्च	लोध्र	२०	३
रदिरन्त	रदितिरन्त	२	६	यज्ञत्वन्वत	यज्ञमतन्वत	६	५	शनिराह	शनिराहू	२१	१
वेवस्वत	वैवस्वत	३	१०	ससपरि	सपरि	९	५	अग्निमूर्द्धा	अग्निर्मूर्द्धा	२१	२०
आन्दवने	आनन्दवने	३	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]यज	तमग्रज	२४	२
तिसिधवं	तिसिंधवः	४	१०	बध्यता	बध्यतां	१३	१	महपीठंमातृकापीठं	मातृकापीठंमहपीठं	३४	१

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

पुर्व

आत्मनःकुल देवता १७	लोकमातरः १३	देवसेना ९	मेधा ५
तुष्टिः १६	मातरः १२	जया ८	शची ४
पुष्टिः १५	स्वाहा ११	विजया ७	पद्मा ३
धृष्टिः १४	स्वधा १०	सावित्री ६	गणेश १ गौरी २

॥ षोडशमातृकाचक्रम ॥

॥ सप्तघृतमातृका ॥

॥ श्रीं ॥



कीर्तिर्लक्ष्मी धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती।
मांगल्येषु प्रपूज्यंते सप्तैता घृतमातरः ॥ १ ॥

॥ इतिवसोर्धारा ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

॥ चतुरस्रकुंडं ॥



॥ सर्वतोभद्रचक्रम् ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri





CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri



॥ श्रीगणेशाय नमः ॥ सान्दीपनिं मुनि श्रेष्ठमवन्तिपुरवासिनम् । रामकृष्णार्चितपदं मालवीयं तपोधनम् ॥ १ ॥ पूर्वाचार्यं जगद्वन्द्यं नत्वा ध्यात्वा मुहुर्मुहुः । मुनीनां मतमालोक्य सम्प्रदायं सतान्तथा ॥ २ ॥ ग्रन्थेभ्यः सारमुद्धृत्य विचार्य सदसच्चयत् । वेदवेदाङ्गविदुषा विश्वेशपुरवासिना ॥ ३ ॥ कर्मकाण्ड्युपनाम्ना वै श्रीयागेश्वरशर्म्मणा । बालानां सुखबोधाय निबन्धः क्रियते मया ॥ ४ ॥ चन्द्रादिशुभग्रहानुकूलसमये शुभेदिने कृतनित्यक्रियो यजमानः शुभासने प्राङ्मुख उपविश्य स्वदक्षिणातः पत्नीं चोपवेश्य । ॐ केशवाय नमः १ ॐ नारायणाय नमः २ ॐ माधवाय नमः ३ ॥ इति त्रिराचम्य । ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव ऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥ १ ॥ इति मन्त्रेण पवित्रधारणं कृत्वा ततः प्राणायामत्रयं कुर्यात् । ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतो पि वा ॥ यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ इत्यात्मानं पूजा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सामग्रीं च संप्रोक्ष्य तण्डुलपूरितताम्रपात्रे मृन्मये वा कुंकुमेनाऽष्टदलं पद्मं कृत्वा तदुपरिगोमयमयीं गौरीं फलमयं गणेशं च संस्थाप्यहस्ते अक्षतपुष्पाणि गृहीत्वा आनोभद्रादीन् मंगलमन्त्रान् पठेत् ॥ ॐ आनोभद्राः क्रतवोयन्तु विश्वतोदब्धासो अपरीतास उद्भिदः। देवानोयथासदमिद्वृधे असन्नप्रायुवो रक्षिता-रोदिवे दिवे ॥ १ ॥ देवानां भद्रासुमतिर्ऋजूयतां देवाना ँ रातिरभिनोनिर्वर्ततताम्। देवाना ँ सख्यमुपसेदिमावयन्देवान ऽआयुः प्रतिरन्तुजीवसे ॥ २ ॥ तान्पूर्व-यानिविदाहूमहेवयं भगम्मित्रमदितिन्दक्षमास्रिधम्। अर्य्यमणंवरुण ँ सोमसश्वि-नासरस्वतीनः सुभगामयस्करत् ॥ ३ ॥ तन्नोवातोमयोभुवातुभेषजं तन्मा-तापृथिवीतत्पिताद्यौः । तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विनाशृणुतन्धि-ष्ण्यायुवम् ॥ ४ ॥ तमीशानं जगतस्तस्थुषस्पतिन्धियं जिन्वमवसेहूमहेव्वयम्। पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये ॥ ५ ॥ स्वस्तिनऽइन्द्रो-वृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः । स्वस्तिनस्ताक्ष्यों ऽअरिष्टनेमिः स्वस्ति नोवृ-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

हस्पतिर्दधातु ॥ ६ ॥ पृषदश्वा मरुतः पृश्निमातरः शुभंय्यावानो विदथेषु जग्मयः ॥ अग्निजिह्वामनवः सूरचक्षसोविश्वेनोदेवाऽअवसागमन्निह ॥ ७ ॥
भद्रंकर्णेभिः शृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवा५ंसस्तनूभिर्व्यशेमहिदेवहितंयदायुः ॥ ८ ॥ शतमिन्नुशरदोऽअन्तिदेवायत्रानश्चक्राजरसंतनूनाम् ॥ पुत्रासोयत्रपितरोभवन्तिमानोमद्ध्यारीरिषतायुर्गन्तोः ॥ ९ ॥
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्मातासपितासपुत्रः ॥ विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्जातमदितिर्जनित्वं ॥ १० ॥ द्यौः शान्तिरन्तरिक्ष५ं शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व५ं शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि ॥ ११ ॥ यतोयतः समीहसेततोनोअभयंकुरु ॥ शन्नःकुरुप्रजाभ्योभयंनःपशुभ्यः ॥ १२ ॥ सुशान्तिर्भवतु ॥ श्रीमन्महागणाधिपतयेनमः ॥ लक्ष्मीनारायणाभ्यांनमः ॥ उमामहेश्वराभ्यांनमः ॥ वाणीहिरण्यगर्भाभ्यांनमः ॥ शचीपुरन्दराभ्यांनमः ॥ माता-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

पितृभ्यांनमः ॥ इष्टदेवताभ्योनमः ॥ कुलदेवताभ्योनमः ॥ ग्रामदेवताभ्योनमः ॥
वास्तुदेवताभ्योनमः ॥ स्थानदेवताभ्योनमः ॥ सर्वेभ्योदेवेभ्योनमः ॥ सर्वेभ्यो-
ब्राह्मणेभ्योनमः ॥ विश्वेशंमाधवंधुण्ढिंदण्डपाणिंचभैरवं ॥ वन्देकाशींगुहांगङ्गां-
भवानींमणिकर्णिकां ॥ १ ॥ वक्रतुण्डमहाकायकोटिसूर्यसमप्रभ ॥ निर्विघ्नंकुरुमे-
देवसर्वकार्येषुसर्वदा ॥ २ ॥ सुमुखश्चैकदन्तश्चकपिलोगजकर्णकः ॥ लम्बोदरश्च-
विकटोविघ्ननाशोविनायकः ॥ ३ ॥ धूम्रकेतुर्गणाध्यक्षोभालचन्द्रोगजाननः ॥ द्वा-
दशैतानिनामानियःपठेच्छृणुयादपि ॥ ४ ॥ विद्यारम्भेविवाहेचप्रवेशेनिर्गमेतथा ॥
संग्रामेसंकटेचैवविघ्नस्तस्यनजायते ॥ ५ ॥ शुक्लाम्बरधरंदेवंशशिवर्णंचतुर्भुजं ॥
प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशान्तये ॥ ६ ॥ अभीप्सितार्थसिध्यर्थंपूजितोयःसुरा-
सुरैः ॥ सर्वविघ्नहरस्तस्मैगणाधिपतयेनमः ॥ ७ ॥ सर्वमङ्गलमंगल्येशिवेसर्वार्थ-
साधिके ॥ शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते ॥ ८ ॥ सर्वदासर्वकार्येषुना-
स्तितेषाममंगलं ॥ येषांहृदिस्थोभगवान्मंगलायतनंहरिः ॥ ९ ॥ तदेवलग्नंसु-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

दिनंतदेवताराबलंचन्द्रबलंतदेव ॥ विद्याबलंदैवबलंतदेवलक्ष्मीपतेतेंऽघ्रियुगंस्मरामि ॥१०॥ लाभस्तेषांजयस्तेषांकुतस्तेषांपराजयः॥ येषामिंदीवरश्यामोहृदयस्थोजनार्दनः ॥ ११ ॥ यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्धरः ॥ तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम ॥ १२ ॥ अनन्यांश्चिंतयंतोमांयेजनाःपर्युपासते ॥ तेषांनित्याभियुक्तानांयोगक्षेमंवहाम्यहं ॥ १३ ॥ स्मृतेसकलकल्याणंभाजनं यत्रजायते ॥ पुरुषंतमजंनित्यंव्रजामि शरणंहरिं ॥१४॥ सर्वेष्वारम्भकार्येषुत्रयस्त्रिभुवनेश्वराः॥ देवादिशंतुनः सिद्धिंब्रह्मेशानजनार्दनाः ॥ १५ ॥ कुशपुष्पयवाक्षतजलद्रव्यंचादायसंकल्पंकुर्यात् । ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतोमहापुरुषस्य विष्णुराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणोद्वितीयेपरार्द्धेविष्णुपदे श्रीश्वेतवाराहकल्पेवैवस्वतमन्वन्तरे अष्टाविंशतिमेयुगेकलियुगेकलिप्रथमचरणे जम्बूद्वीपेभूर्लोकेभारतवर्षेभरतखण्डेआर्यावर्तैकदेशे अविमुक्तवाराणसीक्षेत्रे । आनन्दवनेमहास्मशानेगौरीमुखेत्रिकण्टकविराजिते । भागीरथ्याः पश्चिमेतीरेविक्रमशकेबौद्धा-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ग्र. शा. वतारेअमुकनामसंवत्सरे श्रीसूर्ये अमुकायने अमुकऋतौमहामाङ्गल्यप्रदमासोत्त-
मेमासे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुक-
॥ ३ ॥ योगे अमुककरणेरौद्राद्यमुककाले अमुकराशिस्थितेचन्द्रे अमुकराशिस्थिते श्री-
सूर्ये अमुकराशिस्थितेदेवगुरौशेषेषुग्रहेषुयथायथाराशिस्थानस्थितेषु सत्सुएवं
ग्रहगुणविशेषणविसिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकशर्माहं मम
आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं कायिकवाचिकमानसिक सांसर्गिक
चतुर्विधपातकदुरितक्षयद्वाराधर्मार्थकाममोक्षचतुर्विधलक्ष्मीप्राप्त्यर्थं सर्वग्रहस्व-
रूपी श्रीपरमेश्वरप्रीत्यर्थंग्रहशान्तिमहंकरिष्ये ॥ तदंगत्वेन स्वस्तिपुण्याहवाचनं
अविघ्नपूजनं मण्डपदेवतापूजनं मातृकापूजनं वसोर्द्धारापूजनं आयुष्यमन्त्रजपं राम:
नान्दीश्राद्धं आचार्यादिवरणानि(ग्रहानुकूल्यतासिध्यर्थं ग्रहयज्ञं) च करिष्ये ॥ ॥ ३ ॥
तत्रादौनिर्विघ्नतासिध्यर्थं गणेशाम्बिकयोः पूजनमहंकरिष्ये इति सङ्कल्पः ॥
हस्तेअक्षतान्गृहीत्वा गणपतिमावाहयेत् ॥ तत्रमन्त्रः ॥ हेहेरम्बत्वमेह्येहि-
CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ह्यम्बिकात्र्यंबकात्मज ॥ सिद्धिबुद्धिपतेत्र्यक्षलक्षलाभपितुः पितः ॥ १ ॥ नागास्य नागहारस्त्वं गणराजचतुर्भुज ॥ भूषितः स्वायुधैर्दन्तपाशांकुशपरश्वधैः ॥ २ ॥ आवाहयामिपूजार्थं रक्षार्थं चममक्रतोः ॥ इहागत्यगृहाणत्वं पूजायागं च रक्षमे॥३॥ ॐ गणानांत्वागणपति ँ हवामहेप्रियाणान्त्वाप्रियपति ँ हवामहेनिधीनां त्वा-निधिपतिं ँ हवामहेवसोमम ॥ आहमजानिगर्भधमात्वमजासिगर्भधम् ॥ १ ॥ ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितायगणपतयेनमः गणपतिमावाहयामिस्थापयामि ॥ हेमाद्रितनयां देवीं वरदांभैरवप्रियां ॥ लम्बोदरस्य जननीं गौरीमावाहयाम्यहं ॥१॥ अम्बेअम्बिके वालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकः सुभद्रिकांकांपलिवा-सिनीम् १ ॐ भूर्भुवः स्वः गौर्यैनमः गौरीमावाहयामिस्थापयामि ॥ ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञ ँ समिमन्दधातु ॥ विश्वे-देवास इहमादयन्तामोंप्रतिष्ठ १ अस्यैप्राणाप्रतिष्ठन्तु अस्यैप्राणाक्षरन्तु च ॥ अस्यैदेवत्वमर्चायैमामहेतिकश्चन ॥ १ ॥ गणेशाम्बिकेसुप्रतिष्ठितेवरदेभवतं ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

विचित्ररत्नखचितं दिव्यास्तरणसंयुतं। स्वर्णसिंहासनं चारु गृहाणाश्व सुरपूजित॥

अ. शा. ॐ गणेशाम्बिकाभ्यांनमः आसनं स० ॐ गणेशाम्बि० एतानिपाद्या-
ॾ४॥ र्घ्याचमनीयस्नानीय पुनराचमनीयानिसमर्पयामि ॥ ॐ पञ्चनद्यः सर-
स्वतीमपियन्तिसस्रोतसः ॥ सरस्वतीतुपञ्चधासो देशेभवत्सरित् ॥ १ ॥ पञ्चा-
मृतं मयानीतं पयोदधिघृतं मधु ॥ शर्कराचसमायुक्तं स्नानार्थं प्रतिगृह्यतां ॐ ग०
पंचामृतस्नानं स० अथवा ॐ पयः पृथिव्यांपयऽओषधीषुपयोदिव्यन्तरिक्षेप-
योधाः ॥ पयस्वतीः प्रदिशः संतुमह्यम् ॥ ॐ ग० पयः स्नानं स० ॐ दधि-
क्राव्णोऽअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणऽआयूꣳषि
षितारिषत् ॥ ॐ ग० दधिस्नानं स० ॐ घृतम्मिमिक्षेघृतमस्य योनिर्घृतेश्रितोघृत
म्वस्यधाम ॥ अनुष्वधमावहमादयस्वस्वाहाकृतं वृषभवक्षिहव्यम् ॥ ॐ ग० रामः
घृतस्नानं स० ॐ मधुवाताऋतायतेमधुक्षरंतिसिंधवः माध्वीर्न्नः संत्वोषधीः १ ॥४॥
मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः मधुद्यौरस्तुनः पिता २ मधुमान्नोवन-
स्पतिर्मधुमाँ २ऽ अस्तुसूर्यः ॥ माध्वीर्गावोभवन्तुनः ३ ॐ ग० मधुस्नानं स०

CC-0 Jangamwadi Math Collection. Digitized by eGangotri

ॐ अपा ६. रसमुद्वयस ६. सूर्य्येसंत ६. समाहितम् ॥ अपा ६. रसस्ययोरसस्तंवो
२ गृह्णाम्युत्तमसुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिंद्रायत्वाजुष्टतमम् ॥
ॐ ग० शर्कराम्नानं स० ॐ आपोहिष्ठामयोभुवस्तानऊर्ज्जेदधातन ॥ महेरणा
यचक्षसे ॥३॥ गंगाचयमुनाचैवगोदावरीसरस्वती ॥ नर्मदासिंधुकावेरीस्नानार्थं प्रति
गृह्यतां ॥ ॐ ग० शुद्धोदकस्नानं स० ॐ ग० स्नानांतेआचमनं । स० ॐ युवासु
वासाः परिवीत ऽआगात्सउश्रेयान्भवतिजायमानः ॥ तंधीरासः कवय ऽउन्नयन्ति
स्वाध्योमनसादेवयंतः ॥ शीतवातोष्णसंत्राणलज्जायार ऽक्षणंपरं ॥ देहालंकरणं
वस्त्रमतः शान्तिप्रयच्छमे । ॐ ग० वस्त्रं स० सुजातो० उपवस्त्रं वा ॥ ॐ ग० व
स्त्रोपवस्त्रार्थेरक्तसूत्रंसमर्पयामि अलंकरणार्थे अक्षतान् स० ॥ ॐ यज्ञोपवीतं
परमं पवित्रं प्रजापतेर्यत्सहजंपुरस्तात् ॥ आयुष्यमग्र्यं प्रतिमुंचशुभ्रं यज्ञोपवीतं
बलमस्तुतेजः ॥ नवभिस्तं तुभिर्युक्तं त्रिगुणं देवतामयं ॥ उपवीतं मयादत्तं गृहा
णपरमेश्वर ॥ ॐ ग० यज्ञोपवीतं स० ॥ ॐ ग० आचमनं स० ॥ श्रीखण्डंचन्दनं

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

दिव्यं गन्धाढ्यं सुमनोहरं ॥ विलेपनं सुरश्रेष्ठचन्दनं प्रतिगृह्यताम् ॥ ॐ त्वांग
न्धर्वाऽअखनौंस्त्वामिन्द्रस्त्वांबृहस्पतिः ॥ त्वामोषधेसोमोराजाव्विद्वान्यक्ष्माद-
मुच्यत ॐ ग० गन्धं स० अक्षताश्चसुरश्रेष्ठाः कुंकुमाक्ताः सुशोभिताः ।मया
निवेदिताभक्त्यागृहाणपरमेश्वर ॥ ॐ अक्षन्नमीमदन्तह्यवप्रिया ऽअधूषत ॥ अ-
स्तोषतस्वभानवोव्विप्रानविष्ठयामतीयोजान्विन्द्रतेहरी ॥ ॐ ग० अक्षतान्स०
माल्यादीनिसुगन्धीनिमालत्यादीनिवैप्रभो॥मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यतां
॥१॥ओषधीः प्रतिमोदध्वंपुष्पवतीः प्रसूवरीः ॥ अश्वाऽइवसजित्वरीर्व्वीरुधपार-
यिष्णवः ॥ ॐ ग० पुष्पमालां स० दूर्वांकुरान्सुहरितानमृतान्मंगलप्रदान् ॥
आनीतांस्तवपूजार्थंगृहाणगणनायक ॥ ॐ काण्डात्काण्डात्प्ररोहंतीपरुषः परु-
षस्परि ॥ एवानोदूर्व्वेप्रतनुसहस्रेणशतेन च ॥ ॐ ग० दूर्वांकुरान्स० नानापरि-
मलैर्द्रव्यैर्निर्मितंचूर्णमुत्तमं ॥ अबीरनामकंचूर्णंगन्धचारुप्रगृह्यतां॥ॐ अहिरिवभोगैः
पर्येतिबाहुंज्यायाहेतिंपरिबाधमानः॥हस्तघ्नोव्विश्वाव्वयुनानिव्विद्वान्पुमान्पुमा ६.

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

संपरिपातुव्विश्वतः ॐ ग० नानापरिमलद्रव्याणिस०वनस्पतिरसोद्भूतोगंधाढ्योगं
धउत्तमः॥ आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां ॥ ॐ धूरसिधूर्व्वधूर्व्वतंधूर्वतंज्यो
स्मान्धूर्व्वतितंधूर्व्वयंव्वयंधूर्व्वामः॥ देवानामसिव्वन्हितम ६.सस्नितमंपप्रितमंजुष्ट
तमन्देवहूतमम् ॥ ॐ ग०धूपंस०॥ साज्यंचवर्तिसंयुक्तंवन्हिनायोजितंमया॥ दीपं
गृहाणदेवेशत्रैलोक्यतिमिरापहं॥भक्त्यादीपंप्रयच्छामिदेवायपरमात्मने॥त्राहिमां
निरयाद्धोरादीपज्योतिनमोस्तुते ॥ ॐ अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहासूर्योज्योति-
र्ज्योतिः सूर्यः स्वाहा ॥ अग्निर्व्वर्च्चोज्योतिर्व्वर्च्चः स्वाहासूर्योव्वर्च्चोज्योतिर्व्वर्च्चः
स्वाहा ॥ ज्योतिः सूर्य्यः सूर्योज्योतिः स्वाहा ॥१॥ ॐ ग० दीपं स० हस्तप्रक्षा
लनं नैवेद्यंगृह्यतांदेवभक्तिंमेह्यचलांकुरु॥ ईप्सितंमेवरंदेहिपरत्रचपरांगतिं॥ शर्करा
खंडखाद्यानिदधिक्षीरघृतानि च ॥ आहारंभक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यतां ॥
ॐ नाभ्या ऽआसीदंतरिक्ष ६. शीर्ष्णोद्यौः समवर्तत ॥ पद्भ्याम्भूमिर्दिशः श्रोत्रा
त्तथालोकाँ ऽअकल्पयन् ॐ प्राणायस्वाहा ॐ अपानायस्वा०ॐ समानायस्वा०ॐ

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

उदानायस्वा० ॐ व्यानायस्वा० ॐ ग० नैवेद्यं स० ॐ ग० उत्तरापोशनं स० हस्तप्रक्षालनार्थेजलं स० मुखप्रक्षालनार्थेजलं स० ॥वा आचमनीयंमध्येपानीयं उत्तरापोशनं स० ॥ ॐ चन्दनंमलयोद्भूतंकस्तूर्यादिसमन्वितं ॥ करोद्वर्तनकंदेवगृहाणपरमेश्वर ॐ ग० चन्दनेनकरोद्वर्तनं स० ॐ पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतं ॥ एलादिचूर्णसंयुक्तंतांबूलंप्रतिगृह्यतां ॥ ॐ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसन्तोस्यासीदाज्यंग्रीष्मऽइध्मः शरद्धविः ॥ ॐ ग० मुखवासार्थेपूगीफलतांबूलं स० हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिंप्रयच्छमे ॥ ॐ हिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातः पतिरेकऽआसीत ॥ सदाधारपृथिवीन्द्यामुतेमांकस्मैदेवायहविषाविधेम ॥ ॐ ग० कृतायापूजायाः साद्गुण्यार्थेदक्षिणां स० ॥ कदलीगर्भसंभूतंकर्पूरंतुप्रदीपितं ॥ आरार्तिकमहंकुर्वेपश्यमेवरदोभव ॥ ॐ इदꣳ हविः प्रजननंमेऽअस्तुदशवीरꣳ सर्वगणꣳ स्वस्तये ॥ आत्मसनिप्रजासनिपशुसनिलोकसन्यभयसनि ॥ अग्निः प्रजांबहुलांमेकरोत्त्वन्नम्पयोरेतो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऽअस्मासुधत्त ॥ ॐ ग० कर्पूरनीराजनं स०॥ नानासुगंन्धिपुष्पाणियथाकालोद्भवानिच ॥ पुष्पाञ्जलिर्मयादत्तोगृहाणापरमेश्वर ॥ ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्माणिप्रथमान्यासन्॥ तेहनाकंमहिमानः सचन्तयत्रपूर्वेसाध्याः संतिदेवाः॥ ॐ गणनां त्वा०म् १ ॐ अंबेअंवि०म्॥ ॐ राजाधिराजायप्रसह्यसाहिने ३ नमोवयंवैश्रवणायकुर्महे॥ समेकामान्काममकामायमह्यं कामेश्वरोवैश्रवणोददातु ॥ कुवेरायवैश्रवणायामहाराजायनमः। ॐ स्वस्तिसाम्राज्यंभौज्यंस्वाराज्यंवैराज्यं पारमेष्ठ्यंराज्यंमहाराज्यमाधिपत्यमयंसमंतपर्यायैस्यात् सार्वभौमस्साव्र्वायुषांतादापरार्धात् ॥ पृथिव्यैसमुद्रपर्यंतायाऽएकाराडितितदप्येषश्लोकोभिगीतोमरुतः परिवेष्टारोमरुतस्यावसन्गृहे ॥ आवीक्षितस्यकामप्रेविश्वेदेवाः सभाः सदइति ॥ ॐ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोवाहुरुतविश्वतस्पात् ॥ संवाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयंदेवऽएकः ॥ ॐ ग० मन्त्रपुष्पाञ्जलिं स० यानिकानिचपापानिज्ञाताज्ञातकृतानिच ॥ तानिसर्वाणिनश्यंतिप्रदक्षिणापदेपदे॥ ॐ येती

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ग्र. शा.

॥ ७ ॥

र्थानिप्रचरंतिसृकाहस्तानिषंगिणः। तेषा ६. सहस्रयोजनेवधन्वानितन्मसि ॐग०
प्रदक्षिणां० अथविशेषार्घः॥ जलगंधाक्षतफलपुष्पदूर्वादक्षिणाः ताम्रपात्रेप्रक्षि-
प्य अवनिकृतजानुमंडलः ॐ रक्षरक्षगणाध्यक्षरक्षत्रैलोक्यरक्षक ॥ भक्तानाम
भयंकर्ताञाताभवभवार्णवात् ॥ १ ॥ द्वैमातुरकृपासिन्धोषाण्मातुराग्रजप्रभो ॥ वर
दस्त्वंवरंदेहिवांछितंवांछितार्थद ॥२॥ अनेनफलदानेनफलदोस्तुसदामम ॐ ग०
विशेषार्घ्यंसम०॥ अथप्रार्थना॥ विघ्नेश्वरायवरदायसुरप्रियायलम्बोदरायसकलाय
जगद्धिताय॥ नागाननायश्रुतियज्ञविभूषितायगौरीसुतायगणनाथनमोनमस्ते॥१॥
भक्तार्तिनाशनपरायगणेश्वरायसर्वेश्वरायशुभदायसुरेश्वराय॥ विद्याधरायविकटाय
चवामनायभक्तप्रसन्नवरदायनमोनमस्ते॥२॥ नमस्तेब्रह्मरूपायविष्णुरूपायतेनमः॥
नमस्तेरुद्ररूपायकरिरूपायतेनमः॥३॥ विश्वरूपस्वरूपायनमस्तेब्रह्मचारिणे ॥ भक्त
प्रियायदेवायनमस्तुभ्यंविनायक ॥४॥ लम्बोदरनमस्तुभ्यंसततंमोदकप्रिय ॥ निर्वि
घ्नंकुरुमेदेवसर्वकार्येषुसर्वदा॥५॥ त्वांविघ्नशत्रुदलनेति चसुन्दरेति भक्तप्रियेतिसुखदे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रामः

॥ ७ ॥

तिफलप्रदेतिःविद्याप्रदेत्यघहरेतिचयेस्तुवंतितेभ्योगणेशवरदोभवनित्यमेव॥६॥अन
यापूजयागणेशांबिकेप्रीयेतान्नमम॥इतिगणेशपूजनंसमाप्तम्॥अथकलशस्थापनम्
कलशलक्षणं च॥ स्वर्णं वाराजतं वापिताम्रमृन्मयजंतुवा॥ अकालमव्रणं चैवसर्व
लक्षणसंयुतं॥ पंचाशांगुलवैपुल्यमुत्सेधे षोडशांगुलं॥ द्वादशांगुल कंमूलं मुखमष्टां
गुलं तथा॥ अथ सप्तमृद्ः॥ अश्वऽस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्धृदात्॥ रा
जद्वाराच्चगोष्टाच्चमृदमानीयनिक्षिपेत्॥ अथसर्वौषधयः॥ मुरामांसीबचाकुष्टं शैलेयं
रजनीद्वयं॥सटीचंपकमुस्ताच सर्वौषधिगणास्मृतः॥अथपंचपल्लवान्॥न्यग्रोधोदुंवरो
श्वत्थचूतजं बूतथैवचेति॥ अथपंचरत्नानि॥ कनकंकुलिशं मुक्तापद्मरागंच नील
कमिति॥ प्रकारान्तरम्॥ वज्रमौक्तिकवैदूर्य्यप्रवालं चेन्द्रनीलकम्॥ अलाभेसर्व
रत्नानांहेमंसर्वत्रयोजयेदिति॥ ततः कुंकुमादिनाभूमौअष्टदलंपद्मंकृत्वा॥
ॐ महीद्यौः पृथिवीच न ऽइमं यज्ञंमिमिक्षताम्॥ पिपृतान्नोभरीमभिः इति
भूमिंस्पृष्ट्वा॥१॥ॐ ओषधयः समवदंतसोमेनस हराज्ञा॥ यस्मैकृणोतिब्राह्मणास्त

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ऽ.राजन्पारयामसि॥१॥इति धान्यंत्रिकिरेत्॥ॐ आजिघ्रकलशं मह्यात्वाविशंत्विंदवः
अ. शा. पुनरूर्ज्जानिवर्तस्वसानः सहस्त्रंधुक्ष्वोरुधारापयस्व तीपुनर्म्माविशताद्रयिः॥ इति धा
॥ ८ ॥ न्योपरिकलशंस्थापयेत्॥२॥ ॐ वरुणस्योत्तम्भनमसिवरुणस्यस्कंभसर्ज्जनीस्थोव
रुणस्य ऽऋतसदन्यसिबरुणस्य ऽऋतसदनमासिवरुणस्य ऋतसदनमासीद॥ इति
कलशेजलंपूरयेत्॥३॥ॐत्वांगन्धर्वा०त॥इति गंधंक्षिपेत्॥४॥ॐयाओषधीःपूर्वाजाता
देवेभ्यस्त्रियुगंपुरा॥मनैनुबभ्रूणामह ऽ.शतंधामानिसप्तच इति सर्वौषधयः॥५॥ॐकां
डात्कांडात्प्र० च इति दूर्वाङ्कुरान्॥६॥ॐ अश्वत्थे वोनिषदनं पर्णेवोवसतिष्कृता
गोभाज ऽइत्किलासथयत्सनवथपूरुषम् इति पंचपल्लवान्॥७॥ॐ स्योनापृथिविनो
भवानृक्षरानिवेशनी॥ यच्छानः शर्मसप्रथाः॥८॥इतिसप्तमृदः॥ॐयाः फलिनीर्या ऽअफ
लाअपुष्पा ऽयाश्च पुष्पिणीः॥बृहस्पतिप्रसूतास्तानोमुंचंत्व ऽ.हसः॥इतिपूगीफलम्॥९
ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत॥ दधद्रत्नानिदाशुषेऽइति पंचरत्नानि॥१०॥
हिरण्यगर्भः स० इति हिरण्यम्॥११॥ॐ सुजातोज्योतिषासहशर्म्मवरूथमासदत्स्वः॥ रामः
CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२ वासोऽअग्नेविश्वरूप ६ं. संव्ययस्वविभावसोः इतियुग्मवस्त्रेणाकलशंवेष्टयेत् ॥१०॥
ॐ पूर्णादर्विपरापतसुपूर्णापुनरापत॥ वस्नेवविक्रीणावहाऽइषमूर्य ६ं.शतक्रतो॥इति
पूर्णपात्रमुपरिन्यसेत् ॥१४॥ याः फलिनीतिकलशोपरिनारिकेलफलम् संस्थाप्य॥
ॐतत्वायामि ब्रह्मणावंदमानस्त दाशास्तेयजमानोहविर्भिः॥ अहेडमानो वरुणे-
हबोध्युरुश ६ं.समानऽआयुः प्रमोषीः॥इति अस्मिन् कलशेवरुणंसांगंस सपरिवारं
सायुधंसशक्तिकं आवाहयामि ॥ ॐ अपांपतयेवरुणायनमः ॥ इति पंचोपचारैर्वरुणं
संपूज्य॥ ततोगंगाद्यावाहनं ॥ कलाकलाहिदेवानां दानवानां कलाकलाः॥ संगृह्यनि-
र्मितो यस्मात्कलशस्तेनकथ्यते ॥ कलशस्यमुखेविष्णुः कंठेरुद्रः समाश्रितः ॥
मुलेत्वस्यस्थितोब्रह्मामध्येमातृगणाः स्मृताः ॥२॥ कुक्षौतुसागराः सप्तसप्तद्वीपाच-
मेदिनी ॥ अर्जुनीगोमतीचैवचंद्रभागासरस्वती ॥३॥ कावेरीकृष्णवेणाच गंगाचैव-
महानदी ॥ तापीगोदावरीचैवमाहेंद्रीनर्मदा तथा ॥४॥ नदाश्चविविधाजातानद्यः
सर्वास्तथापराः॥पृथिव्यांयानितीर्थानिकलशस्थानितानिवै॥५॥सर्वेसमुद्राःसरित-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

स्तीर्थानिजलदानदाः॥ आयांतुममशांत्यर्थं दुरितक्षयकारकाः ॥६॥ ऋग्वेदोथय-
जुर्वेदः सामवेदोह्यथर्वणः ॥ अंगैश्चसहिताः सर्वेकलशं तुसमाश्रिताः ॥७॥ अत्र
गायत्रीसावित्रीशान्तिः पुष्टिः करीतथा॥आयान्तुममशांत्यर्थंदुरितक्षयकारकाः॥८॥
यजमानःस्वहस्तेअक्षतान्गृहीत्वा॥ ॐ मनोजूतिर्जु० तिष्ठ॥ कलशेवरुणाद्यावाहि-
तदेवताःसुप्रतिष्ठिताःवरदाःभवन्तु॥ ॐवरुणाद्यावाहितदेवताभ्योनमः॥ विष्णवा-
द्यावाहितदेवताभ्योनमइतिवा॥आसनार्थेअक्षतान्समर्पयामि॥पादयोःपाद्यंस०॥
हस्तयोः अर्घ्यंस०॥आचमनंस०॥पंचामृतस्नानंस०॥शुद्धोदकस्नानंस०॥ स्नानां
गाचमनंस०॥ वस्त्रंस०॥ यज्ञोपवीतंस०॥ आचमनंस०॥उपवस्त्रंस०॥आचमनं० गंधं
स०॥अक्षतान्स०॥ पुष्पमालांस०॥ नानापरिमलद्रव्याणिस०॥ धूपंस०॥ दीपंस०॥
हस्तप्रक्षालनं॥नैवेद्यंस० ॥ तांबूलंस० ॥पूगीफलंस०॥ कृतायाः पूजायाः साद्गु-
ण्यार्थेदक्षिणांस०॥आर्तिक्यंस०॥ मंत्रपुष्पांजलिंस०॥ प्रदक्षिणांस०॥ नमस्का
रंस०॥अनयापूजयावरुणाद्यावाहितदेवताः प्रीयंतांनमम॥ अथ प्रार्थना॥ देवदा-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

नवसंवादेमथ्यमानेमहोदधौ। उत्पन्नोसितदाकुम्भविधृतोविष्णुनास्वयं॥ १ ॥ त्व-
त्तोयेसर्वतीर्थानिदेवाः सर्वेत्वयिस्थिताः। त्वयितिष्ठंतिभूतानित्वयिप्राणाः प्रतिष्ठि-
ताः॥ २ ॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः। आदित्यावसवोरुद्राविश्वे-
देवाः सपैतृकाः॥३॥ त्वयितिष्ठंतिसर्वेपियतः कामफलप्रदः। त्वत्प्रसादादिमंयज्ञं-
कर्तुमीहेजलोद्भव ॥४॥ सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदा ॥५॥ नमोनमस्तेस्फ-
टिकप्रभायसुश्वेतहारायसुमंगलाय। सुपाशहस्तायझषासनायजलाधिनाथायन-
मोनमस्ते॥ १ ॥ पाशपाणेनमस्तुभ्यंपद्मिनी जीवनायक। पुण्याहवाचनंयावत्ताव-
त्वंसन्निधौभव॥ इतिकलशप्रार्थना॥ अथपुण्याहवाचनं ॥ अवनीकृतजानुमंडलः
कमलमुकुलसदृशमंजलिंशिरस्याधायानंतरंदक्षिणेनपाणिनास्वर्णपूर्णकलशंधार-
यित्वाआशिषः प्रार्थयेत् ॥८॥ दीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानिच॥ तेना-
युःप्रमाणेनपुण्यंपुण्याहंदीर्घमायुरस्तु॥ विप्राःअस्तुदीर्घमायुः। ॐत्रीणिपदाविच-
क्रमेविष्णुर्गोपाऽअदाभ्यः॥ अतोधर्माणिधारयन् ॥१॥ तेनायुःप्रमाणेनपुण्यंपुण्या-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

हं दीर्घमायुरस्तुइतिभवन्तो ब्रुवंतुइतियजमानः ॥ २ ॥ पुण्यंपुण्याहंदीर्घमायुर-
स्त्वितिद्विजाः ॥ एवंद्विरपरंशिरसिभूमौनिनयेत् ॥ ब्राह्मणान् हस्ते ॐ शिवाआपः
संतुइतिजलं ॥ यजमानः संतुशिवापः ॥ ब्राह्मणाः एवंसर्वत्र ॥ यज० ॥ सौम
नस्य मस्तुइतिपुष्पं ॥ वि० अस्तुसौमनस्यं ॥ ४ ॥ यज० अक्षतंचारिष्टंचास्तु-
इत्यक्षतान्० ॥ ४ ॥ विप्राः अस्त्वक्षतमरिष्टंच ॥ यज० गंधाः पांतुइतिगंधं० ॥
विप्राः सुमंगल्यंचास्तु ॥ यज० अक्षताः पांतु ॥ विप्राः आयुष्यमस्तु ॥ यज०
पुष्पाणिपांतु ॥ विप्राः सौश्रीयमस्तु ॥ य ज० सफल तांबूलानिपांतु ॥ विप्राः
ऐश्वर्यमस्तु ॥ य ज० दक्षिणाः पांतु ॥ विप्राः बहुदेयंचास्तु ॥ यज० दीर्घमायुः
शांतिः पुष्टिस्तुष्टिः श्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंबहुधनंचायुष्यंचास्तु ॥ विप्राः
तथास्तु ॥ यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवर्ततेतमह-
मोंकारमादिंकृत्वाऋग्यजुः सामाथर्वाशीर्वचनंबहुऋषिमतंसमनुज्ञातंभवद्भिरनुज्ञातं
पुण्यंपुण्याहंवाचयिष्ये ॥ विप्राः वाच्यतां ॥ ॐ द्रविणोदाः पिपीषतिजुहोतप्रचतिष्ठत ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नेष्ट्रा दृतुभिरिष्यत ॥१॥ सवितात्वासवाना ६. सुवतामग्निर्गृहपतीना ६. सोमोव्वन-
स्पतीनाम् ॥ वृहस्पतिर्बाच ऽइन्द्रोज्यैष्ठ्यायरुद्रःपशुभ्योमित्रःसत्योवरुणोधर्मपती-
नाम्॥१॥ नतद्रक्षा ‿ सिनापिशाचास्तरंतिदेवानामोजःप्रथमज ६. ह्येतत्॥जोविभ-
र्तिदाक्षायण ६.हिरण्य ६.सदेवेषुकृणुतेदीर्घमायुःसमनुष्येषुकृणुतेदीर्घमायुः॥३॥
उच्चातेजातमंधसोदिविसद्भूम्यादधे॥ उग्र ६.शर्ममहिश्रवः॥४॥उपास्मैगायतानरः
पवमाना ऽएन्दवे॥ अभिदेवां ऽइयक्षते॥५॥ ॐ इत्येतार्चयः पुण्याहेब्रूयात्॥ व्रत ज-
पनियमतपः स्वाध्यायक्रतुशमदमदयादानविसिष्टानांसर्वेषांब्राह्मणानांमनः समा-
धीयतांइतियज०॥समाहितमनसःस्मः॥इतिब्रा०॥प्रसीदंतुभवन्तःइतिय०॥ प्रस-
न्नास्मःइतिब्रा०॥ ततोयजमानोब्रूयात्॥ शांतिरस्त्वित्यादि॥ अस्त्वितिद्विजाः प्रतिव-
चनंसर्वत्रदद्युः॥ॐशांतिरस्तु॥१॥ॐपुष्टिरस्तु॥२॥ॐतुष्टिरस्तु॥३॥ॐवृद्धिरस्तु॥४॥
ॐ अविघ्नमस्तु॥५॥ॐआयुष्यमस्तु॥६॥ॐआरोग्यमस्तु॥७॥शिवमस्तु॥८॥ ॐशि-
वंकर्मास्तु॥९॥ॐकर्मसमृद्धिरस्तु॥१०॥ ॐ धर्मसमृद्धिरस्तु॥११॥ॐवेदसमृद्धिरस्तु

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

॥१२॥ॐ शास्त्रसमृद्धिरस्तु॥१३॥ॐ धनधान्यसमृद्धिरस्तु॥१४॥ॐ पुत्रपौत्रसमृद्धि-
रस्तु॥१५॥ॐ इष्टसंपदस्तु॥१६॥ ॐ अरिष्टनिरसनमस्तु॥१७॥बहिः ॐ यत्पापं-
रोगंअशुभंअकल्याणंतद्दूरेंप्रतिहतमस्तु॥१८॥अंतः ॐ यच्छ्रेयस्तदस्तु॥१९॥ॐ उत्त-
रेकर्मणिनिर्विघ्नमस्तु॥२०॥ॐ उत्तरोत्तरमहरहराभिवृद्धिरस्तु॥२१॥ॐ उत्तरोत्तराः
क्रियाःशुभाःशोभनाःसंपद्यंतां॥२२॥ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु॥२३॥
ॐ तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां॥ ॐ तिथिकरणेसमुहूर्तेसनक्ष-
त्रेसग्रहेसलग्नेसाधिदैवतेप्रीयेतां॥ ॐ दुर्गापांचाल्यौप्रीयेतां॥ ॐ अग्निपुरोगाविश्वे-
देवाः प्रीयन्तां॥ ॐ इन्द्रपुरोगाः मरुद्गणाः प्रीयन्तां॥ ॐ वसिष्ठपुरोगाःऋषिगणाः
प्रीयन्तां॥ ॐ माहेश्वरीपुरोगाःउमामातरःप्रीयन्तां॥ ॐ अरुंधतीपुरोगाएकपत्न्यः-
प्रीयतां॥ ॐ विष्णुपुरोगाःसर्वेदेवाःप्रीयन्तां॥ ॐ ब्रह्मपुरोगाःसर्वेवेदाः प्रीयन्तां॥
ॐ ब्रह्मचब्राह्मणाश्चप्रीयन्तां॥ ॐ श्रीसरस्वत्यैप्रीयेतां। ॐ श्रद्धामेधेप्रीयेतां॥ ॐ
भगवतीकात्यायनीप्रीयतां॥ॐ भगवतीमाहेश्वरीप्रीयतां॥ॐ भगवतीऋद्धिकरीप्री-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यतां ॥ॐ भगवतीवृद्धिकरीप्रीयतां ॥ॐ भगवतीपुष्टिकरीप्रीयतां ॥ॐ भगवतीतुष्टि-
करीप्रीयतां ॥ ॐ भगवंतौविघ्नविनायकौप्रीयेतां ॥ॐ सर्वाः कुलदेवताःप्रीयन्तां ॥ ॐ
सर्वाःग्रामदेवताः प्रीयन्तां ॥ ॐ सर्वाः इष्टदेवताः प्रीयन्तां ॥ बहिः ॐ हताश्वब्रह्म-
द्विषः ॐ हताश्वपरिपन्थिनः ॐ हताश्वविघ्नकर्त्तारः शत्रवःपराभवंयांतु ॥ ॐ शा-
म्यंतुघोराणि ॐ शाम्यंतुपापानि ॐ शाम्यंत्वितयः ॐ शाम्यंत्युपद्रवाः ॥अन्तः ॐ
शुभानिवर्धतां ॥ॐ शिवाआपः संन्तु ॥ॐ शिवाऋतवः सन्तु ॥ॐ शिवाओषधयः
सन्तु ॥ॐ शिवावनस्पतयः सन्तु ॥ ॐ शिवाअतिथयः सन्तु ॥ॐ शिवाग्नयः सन्तु ॥
ॐ शिवाहुतयः सन्तु ॥ॐ अहोरात्रेशिवेस्यातां ॥ॐ निकामेनिकामेनः पर्जन्योवर्ष-
तुफलवत्योनः ओ षधयःपच्यन्तांयोगक्षेमोनः कल्पताम् ॥ ॐ शुक्रांगारकबुधबृ-
हस्पतिशनैश्चरराहुकेतुसोमसहित आदित्यपुरोगाः सर्वेग्रहाः प्रीयन्ताम् ॥ ॐ
भगवान्नारायणः प्रीयतां ॥ ॐ भगवान्पर्जन्यः प्रीयतां ॥ ॐ भगवान्स्वामीम-
हासेनः प्रीयतांपुरोनुवाक्यायायत्पुण्यं तदस्तु ॥ याज्ययायत्पुण्यंतदस्तु ॥ वषट्कारे-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ. शा. ॥ १२ ॥

गयत्पुणयंतदस्तु ॥ प्रातःसूर्योदयेयत्पुण्यंतदस्तु ॥ एतत्कल्याणयुक्तं पुण्यं पुण्याहं-
वाचयिष्येइति य० ॥ ॐ वाच्यतामिति ब्राह्मणाः ॥ ॐ ब्राह्मयंपुण्यमहर्य्यच्चसृ-
ष्ट्युत्पादनकारकं ॥ वेदवृक्षोद्भवंनित्यंतत्पुण्याहंब्रुवंतुनः ॥ भोब्राह्मणाः मयाक्रिय-
माणस्य अमुकाख्यस्यकर्मणः पुण्याहंभवंतोब्रुवंतु इति यज० ॥ ॐ पुण्याहं ब्रा०
एवं वचनं प्रतिवचनंचत्रिः पठित्वा तथाहि ॥ अस्यकर्मणः पुण्याहंभवन्तोब्रुवंन्तु
ॐ पुनंतु मादेवजनाः पुनंतुमनसाधियः ॥ पुनन्तुविश्वाभूतानिजातवेदः पुनी-
हिमा ॥ १ ॥ पृथिव्यामुद्धृतायांतुयत्कल्याणं पुराकृतं ॥ ऋषिभिः सिद्धिगंध-
र्वैस्तत्कल्याणंब्रुवंतुनः ॥ २ ॥ भोब्राह्मणाः मयाक्रियमाणस्य अमुकाख्यस्य
कर्मणः कल्याणंभवंतोब्रुवंतु ॥ ॐ कल्याणं ॥ ३ ॥ ॐ यथेमांव्वाचंकल्याणी-
मावदानिजनेभ्यः ॥ ब्रह्मराजन्याभ्या ६. शूद्रायचार्यायचस्वायचारणायच ॥ प्रि-
योदेवानांदक्षिणायैदातुरिहभूयासमयंमेकामः समृध्यतामुपमादोनमतु ॥२॥ सा-
गरस्यतुयारिद्धिर्महालक्ष्म्यादिभिःकृता ॥ संपूर्णास्युःप्रभावाचतांऋद्धिंप्रब्रुवंतुनः३॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रामः ॥ १२ ॥

भोब्राह्म० कर्मणःऋद्धिंभवन्तोब्रुवन्तु ॥ ॐ कर्मऋध्यता ॥ ॐ सत्रस्यऋद्धि रस्य-
गन्मज्योतिरमृता ऽअभूम ॥ दिवंपृथिव्या ऽअध्यारुहामाविदामदेवान्स्वर्ज्योतिः॥३॥
स्वस्तिस्तुयाविनाशाख्यापुण्यकल्याणवृद्धिदा ॥ विनायक प्रियानित्यंतांचस्व
स्तिंब्रुवन्तुनः॥ भोब्राह्मणाः० कर्मणेस्वस्तिभवन्तोब्रुवन्तु ॥ ॐ आयुष्मते स्वस्ति
ॐस्वस्तिन ऽइन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः॥स्वस्तिनस्तार्क्ष्योअरिष्टनेमिः
स्वस्तिनोवृहस्पतिर्दधातु ॥ ४ ॥ समुद्रमथनाज्जाताजगदानंदकारिका ॥ हरि-
प्रिया च मांगल्यातांश्रियं च ब्रुवन्तुनः ॥ भोब्राह्म० कर्मणः श्रीरस्त्वितिभव-
न्तोब्रुवन्तु ॥ ॐ अस्तुश्रीः ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरू-
पमश्विनौव्यात्तम्॥ इष्णन्निषाणामुंम ऽइषाणसर्वलोकंम ऽइषाण ॥५॥ मृकंडसूनो-
रायुर्यद्ध्रुवलोमशयोस्तथा आयुषातेनसंयुक्ताजीवेमशरदः शतं ॥१॥ जीवंतुभवंतः
इतिब्रा०॥ॐ शतमिन्नुशरदो ऽअंतिदेवायत्रानश्चक्राजरसंतनूनाम्॥ पुत्रासोयत्र-
पितरोभवन्तिमानोमध्यारीरिषतायुर्गंतोः॥शिवगौरीविवाहेयायाश्रीरामेनृपात्मजे॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ. शा. धनदस्यगृहेयाश्रीरस्माकंसास्तुसद्मनि॥ ॐ अस्तुश्रीः॥ ॐ मनसःकाममाकूतिं-
॥ १३ ॥ वाचःसत्यमशीय ॥ पशूना ६. रूपमन्नस्यरसोयशः श्रीः श्रयतांमयिस्वाहा ॥१॥
प्रजापतिर्लोकपालोधाताब्रह्माचदेवराट् ॥ भगवान्छाश्वतोनित्यंनोवैरक्षंतुसर्वतः॥
ॐ भगवान्प्रजापतिः प्रीयतां ॥ ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरि-
ताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोअस्त्वयममुष्यपितासावस्यपिताव्वय ६. स्या-
मपतयोरयीणा ⌣ स्वाहा ॥ २ ॥ आयुष्मतेस्वस्तिमतेयजमानायदाशुषे ॥ श्री
येदत्ताशिषः सन्तुऋत्विग्भिर्वेदपारगैः ॥ ॐ आयुष्मतेस्वस्ति ॥ ॐ प्रतिपन्था-
मपद्महिस्वस्तिगामनेहसम् ॥ येनविश्वाःपरिद्विषोवृणक्तिविन्दतेवसु ॥ ॐ स्व-
स्तिवाचनसमृद्धिरस्तु ॥ कृतस्यस्वस्तिवाचनकर्मणः समृध्यर्थंस्वस्तिवाचके-
भ्योब्राह्मणेभ्योइमांदक्षिणांविभज्यदातुमहमुत्सृजे ॥ अथाभिषेकः॥ अभिषेके- रामः
पत्नीवामतः एकस्मिन्पात्रेवरुणोदकंगृहीत्वाऽविधुराश्चत्वारोब्राह्मणाःदूर्वाम्रपल्लवैः ॥ १३॥
सकुटुंबंयजमानमभिषिंचेयुः तन्मन्त्राः॥ ॐ पयः पृथिव्या० ॥ १ ॥ ॐ पंच

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नद्यः० ॥ २ ॥ ॐ वरुणस्योत्तं० ॥ ३ ॥ ॐ पुनन्तुमा० ॥४॥ ॐ देवस्यत्वा-सवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ सरस्वत्यैवाचोयन्तुर्यंत्रियेदधामि-बृहस्पतेष्ट्वासाम्राज्येनाभिषिंचाम्यसौ ॥ ५ ॥ देवस्यत्वा० ॥ सरस्वत्यैवाचो-यन्तुर्यंत्रेणाग्नेःसाम्राज्येनाभिषिंचामि ॥ ६ ॥ देवस्यत्वा० ॥ अश्विनोर्भैषज्येन-तेजसेब्रह्मवर्चसायाभिषिंचामिसरस्वत्यैभैषज्येनवीर्यायान्नाद्यायाभिषिंचामीन्द्र-स्येन्द्रियेणवलायश्रियैयशसेभिषिंचामि ॥७॥ ॐ विश्वानिदेवसवितर्दुरितानिपरा-सुव ॥ यद्भद्रन्तन्नऽआसुव ॥८॥ धामच्छदग्निरिन्द्रोब्रह्मादेवोबृहस्पतिः ॥ सचेतसो विश्वेदेवायज्ञंप्रावंतुनःशुभे ॥ ९ ॥ त्वंयविष्ठदाशुषोनॄंः हेपाहिशृणुधीगिरः ॥ रक्षा-तोकमुतत्मना ॥ ११ ॥ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः ॥ प्रप्रदातारंता-रिषऽ ऊर्जन्नोधेहिद्विपदेचतुष्पदे ॥ १२ ॥ द्यौः शान्तिरंत० ॥ १३ ॥ यतोयतः स० ॥ १४ ॥ अमृताभिषेकोस्तु इतिपुण्याहवाचनप्रयोगः ॥ अविघ्नोमंडपश्चैव-मातृणांपूजनंसकृत् ॥ वैश्वदेवंवसोर्द्धारांनांदीश्राद्धमतः परम् ॥ विवाहोपन-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

यनचूडाकर्णसीमंतोन्नयनादौ मोदश्चैवप्रमोदश्चसुमुखोदुर्मुखस्तथा ॥ अविघ्नो-
विघ्नहर्त्ताचषडेतेविघ्नविनायकाः ॥ ॐ मोदायनमः मोदं आ०॥ १॥ ॐ प्रमोदा-
य० प्रमोदं आ० ॥ २ ॥ ॐ सुमुखाय० सुमुखं आ० ॥ ३ ॥ दुर्मुखाय०
दुर्मुखं० ॥ ४ ॥ अविघ्नाय० ॥ ५ ॥ अविघ्नं आ० ॥ ६ ॥ विघ्नहर्त्रे० विघ्नहर्तारं० ॥
आ० ॐ मोदादिषड्विनायकेभ्योनमः इति पूजयेत् ॥ इति अविघ्नपूजनं ॥ अथ
मण्डपदेवताप्रतिष्ठाततोमंण्डपार्थस्तंभारोपणं तद्यथा ॥ ॐ देवस्यत्वास०
भ्यांइत्यभ्रिमादत्ते ॥ १ ॥ ॐ इदमह ६. रक्षसांग्रीवाऽ अपिकृंतामि
इत्यवटंपरिलिखति ॥ २ ॥ ॐ मावोरिषत्खनितायस्मैचाहंखनामिवः ॥ द्विपाच्च-
तुष्पादस्माक ६. सर्वमस्त्वनातुरम् इतिखनति ॥ ३ ॥ ॐ सिंचंतिपरिषिंचंत्युत्सिं चं
तिपुनंतिच ॥ सुरायैबभ्रैमदेकिंत्वोवदतिकिंत्वः इति तस्मिन्नवटेअपः आसिंचति
॥ ४ ॥ ॐ यवोसियवयास्मद्वेषोयवयारातीः ॥ इतियवानावपति ॥ ५ ॥ दर्भसिद्धार्थकांस्तू-
ष्णीमावपति ॥ ॐ कांडात्कां० चइतिदूर्वांकुरान् ॥ ६ ॥ ॐ दधिक्राव्णो० त् इतिदाधि ॥ ७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ॐ याः फलीनी० सः इतिफलम् ॥८॥ ॐ हिरण्यगर्भः०म इतिहिरण्यंचावपति ॥९॥ ॐ उच्छ्रयस्वऽवनस्पत ऊर्ध्वोमापाह्य ६. हस ऽ आस्ययज्ञस्योदृचः ॥ इति मन्त्रेणारक्तसूत्रबद्धमदनफलसमन्वितस्तंभोत्थापनं ॥ १० ॐ ऊर्ध्वऽ ऊषुणाऽ ऊतयेतिष्ठादेवोनसविता ॥ ऊर्द्ध्वोवाजस्यसनितायदंजिभिर्वाघद्भिर्विंह्यामहेइ-त्यवटेरोपणं ॥ ॐ स्थिरोभववीड्वंगऽ आशुर्भववाज्यर्वन् ॥ पृथुर्भवसुखदस्त्व-मग्नेः पुरीषवाहणः ॥ इतिसमंततोमृत्पूर्णेन स्थिरकरणं ॥ तस्मिन्स्तंभे ॥ ॐ नलिन्यैनमः ॥ १ ॥ ॐ नन्दिन्यै० ॥ २ ॥ ॐ मैत्रायै० ॥ ३ ॥ ॐ उमायै० ॐ पशुवर्द्धिन्यै० ॥ ५ ॥ ॐ मनोजू० ष्ट मंडपदेवताः सुप्रतिष्ठिताः वरदाः भवन्तु इति प्रतिष्ठाप्य ॥ ॐ मंडपदेवताभ्योनमः इति षोडशोपचारैर-भ्यर्चनं ॥ मंडपदेवताप्रीत्यर्थंयथाशक्तिब्राह्मणान्भोजयिष्ये ॥ अत्रशिष्टाचार-एवशरणं । मंडपप्रतिष्ठातुसीमंतोन्नयनान्नप्राशनचूडाकरणोपनयनवेदारंभकेशां-तव्रतविसर्गविवाहेषुकार्या ॥ तत्रैवमंडपसत्वात् मंडपस्तंभनिवेशनंतु ॥ वृषाद्रा-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

शित्रयेस्थितेसूर्येसतिआग्नेयांकार्यम् ॥ सिंहाद्राशित्रयेईशान्याम् ॥ वृश्चिकाद्राशित्रयेवायव्यां ॥ कुंभाद्राशित्रयेनैर्ऋत्यां ॥ इतिमंडपदेवताप्रतिष्ठा ॥ अथमातृकापूजनं अथाग्नेयां प्रतिमास्वक्षतपुंजेषुवाप्राक् संस्थमुदक् संस्थंवामातृस्थापनं ॥ ॐ भूर्भुवः स्वः गणपतये० ॥ गणपतिं आवाहयामिस्थापयामि । ॐ भूर्भुवः स्वः गौर्यैन० ॥ गौरीमा० ॥ २ ॥ ॐ पद्मायै० ॥ पद्मां० ॥ ३ ॥ ॐ शच्यै० ॥ शचीं ॥ ४ ॥ ॐ मेधायै० ॥ मेधां ॥ ५ ॥ ॐ सावित्र्यै० ॥ सावित्रीं ॥६॥ ॐ विजयायै० ॥ ॐ विजयां० ॥७॥ ॐ जयायै० ॥ जयां०॥८॥ ॐ देवसेनायै० ॥ देवसेनां० ॥९॥ ॐ स्वधायै० स्वधां० ॥ १० ॥ ॐ स्वाहायै० ॥ स्वाहां० ॥११॥ मातृभ्यो० ॥ मातॄः ॥१२॥ ॐ लोकमातृभ्यो० ॥ लोकमातॄः० ॥१३॥ धृत्यै०॥ धृतिमा०॥१४॥ ॐ पुष्ट्यै०॥ पुष्टिं०॥१५॥ ॐतुष्ट्यै०॥तुष्टिं॥१६॥ ॐ आत्मनःकुलदेवतायै०॥आत्मनःकुलदेवतां॥१७॥ ॐ मनो०ष्ठ०॥ गौर्याद्याः कुलदेवतांताः मातरोगणपतिसहिताः सुप्रतिष्ठिताः वरदाः भवंतु ॥ ॐ गणप-

CC-0 Jangamwadi Math Collection. Digitized by eGangotri

त्यादि कुलदेवतांतमातृभ्योनमः इत्यभ्यर्चनं ॥ चूडाकरणोपनयनविवाहेषुयथा-
कुलाचारंमातृभांडस्थापनं ॥ अथवसोर्द्धारापूजनं ॥ ॐ वसोःपवित्रमसिशत-
धारं वसोःपवित्रमसिसहस्रधारं ॥ देवस्त्वासवितापुनातुवसोःपवित्रेणशतधारेण-
सुप्वा ॥ इतिमन्त्रेणघृतेनपंचसप्तवाप्राक्संस्थाउदक्संस्थावावसोर्द्धाराकर्तव्याः
ॐ कामधुक्षइत्येतावतामन्त्रेणार्धभागेगुडेनैकीकरणं कुंकुमादिनाविन्दुकरणेना-
लंकरणं प्रतिधारामेकैकदेवतामावाहयेत् ॥ ॐ श्रीयैनमः ॥ श्रियमा० ॥ १ ॥
ॐ लक्ष्म्यैन० ॥ लक्ष्मीमा० ॥ २ ॥ ॐ धृत्यै० ॥ धृतिमा० ॥ ३ ॥ ॐ मेधा-
यै० ॥ मेधामा० ॥ ४ ॥ ॐ स्वाहायै० ॥ स्वाहां० ॥ ५ ॥ ॐ प्रज्ञायै० ॥ प्र-
ज्ञामा० ॥ ६ ॥ ॐ सरस्वत्यै० ॥ सरस्वतीमा० ॥ ७ ॥ ॐ श्रीलक्ष्मीधृतिमेधा-
स्वाहाप्रज्ञासरस्वतीभ्योनमइत्यर्चनं ॥ ॐ वसोर्धारादेवताभ्योनमइतिवात्रावा-
ह्य ॥ ॐ मनो० वसोर्द्धारादेवताः सुप्रतिष्ठिताःवरदाः भवन्तुसंपूज्यप्रार्थयेत् ॥
यदंगत्वेनभोदेव्यः पूजिताविधिमार्गतः ॥ कुर्वन्तुकार्यमखिलंनिर्विघ्नेनक्रतूद्भवं ॥ अ-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

नयापूजयावसोर्द्धारादेवताःप्रीयंतां०॥इति वसोर्द्धाराकरणं॥अथायुष्यमन्त्रजपः॥
ॐ आयुष्यंवर्चस्य ६. रायस्पोषमौद्भिदम्॥ इद ६. हिरण्यंवर्चस्वय्यैत्रायाविश-
तादुमाम् ॥ १ ॥ न तद्रक्षा ६. सि० युः ॥ २ ॥ यदावध्नंदाक्षायणाहिरण्य ६.
शतानीकायसुमनस्यमानाः॥तन्मऽआवध्नामिशतशारदायायुष्मान्जरदष्टिर्यथास-
म् इत्यायुष्यमंत्रजपः ॥ अथ सांकल्पेनविधिनानांदीश्राद्धप्रयोगः ॐ सत्यव-
सुसंज्ञकाः विश्वेदेवाः नांदीमुखाः भूर्भुवः स्वः इदंवः पाद्यंपादावनेजनंपादप्र-
क्षालनंवृद्धिः ॐ अमुकगोत्राः मातृपितामहीप्रपितामह्यः नान्दीमुख्यः भूर्भुवः
स्वः इदं वः पाद्यंपादावनेजनंपादप्रक्षालनंवृद्धिः ॥ २ ॥ ॐ अमुकगोत्राः पितृपि-
तामहप्रपितामहाः नांदीमुखाः भूर्भुवः स्वः इदं वः पाद्यंपादावनेजनंपादप्रक्षा-
लनंवृद्धिः ॥ ३ ॥ ॐ अमुकगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सप-
त्निकाः नांदीमुखाः भूर्भुवः स्वः इदं वः पाद्यंपादावनेजनंपादप्रक्षालनंवृद्धिः ॥४॥
आसनदानं सत्यवसुसंज्ञकाः विश्वेदेवाः नांदीमुखाः भूर्भुवः स्वः इमे आसने-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

वोनमोनमः ॐ अमुकगोत्राः मातृपितामहिप्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः इमे आसनेवोनमोनमः ॥२॥ ॐ अमुकगोत्राः पितृपितामहप्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इमे आसनेवोनमोनमः ॥ ३ ॥ ॐ अमुकगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्निकाः नान्दीमुखाः भूर्भुवः स्वः इमे आसनेवोनमोनमः ॥४॥ गन्धादिदानं विश्वेदेवादि ॥ गन्धपुष्पधूपदीपताम्बूलपूगीफलवस्त्रयज्ञोपवीतानिदद्यात्॥ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदङ्गंधाद्यर्चनं स्वाहासंपद्यतांवृद्धिः ॥ १ ॥ ॐ अमुकगोत्राः मातृपितामहिप्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः इदं गन्धाद्यर्चनंस्वाहा संपद्यतांवृद्धिः॥ २ ॥ ॐ अमुकगोत्राः पितृपितामहप्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इदं गन्धाद्यर्चनंस्वाहा संपद्यतांवृद्धिः ॥३॥ ॐ अमुकगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्निकाः नान्दीमुखाः भूर्भुवः स्वः इदं गन्धाद्यर्चनंस्वाहा संपद्यतांवृद्धिः ॥ ४ ॥ ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदं युग्म-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यं अमृतरूपेणस्वाहा संपद्यतांवृद्धिः ॥१॥
ॐ अमुकगोत्राः मातृपितामहिप्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः इदं युग्म-
ब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यं अमृतरूपेणस्वाहा संपद्यतांवृद्धिः॥२॥
ॐ अमुकगोत्राः पितृपितामहप्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इदं युग्म-
ब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यं अमृतरूपेणस्वाहा संपद्यतांवृद्धिः॥३॥
ॐ अमुकगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्निकाः नान्दीमुखाः
भर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यं अमृतरूपेण-
स्वाहा संपद्यतांवृद्धिः ॥ ४ ॥ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः
प्रीयंतां ॥ १ ॥ गोत्राः मातृपितामहिप्रपितामह्यः नांदीमुख्यः प्री-
यंतां ॥ २ ॥ गोत्राः पितृपितामहप्रपितामहाः नांदीमुखाः प्रीयंतां ॥ ३ ॥
द्वितीयगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्निकाः नांदीमुखाः प्री-
यंतां ॥ ४ ॥ शिवा आपः संतु ॥ सौमनस्यमस्तु ॥ अक्षतं चारिष्टं चास्तु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अघोराः पितरः सन्तु इति पूर्वाग्रांजलधारांदद्यात् ॥ ततः कृतांजलिः प्रार्थयेत्
ॐ गोत्र न्नोवर्धतांदातारोनोभिवर्धतांवेदाः संततिरेवच ॥ श्रद्धाचनोमाव्यगमद्ब-
हुदेयंचनोस्तु अन्नंचनोबहुभवेदतिथींश्चलभेमाहि ॥ याचितारश्चनः संतुमाचयाचि-
ष्मकंचन ॥ एताः सत्याश्राशिषः संतु संत्वेतासत्याः आशिषः इति ॐ सत्यव-
सुसंज्ञकाः विश्वेदेवाः नांदीमुखाः भूर्भुवः स्वः कृतस्य नांदीश्राद्धस्य फलप्रति-
ष्ठासिध्यर्थंद्राक्षामलकयवमूलनिष्क्रयणीं दक्षिणांदातुमहमुत्सृजे ॥ १ ॥ ॐ अ-
मुकगोत्राः मातृपितामहिप्रपितामह्यः नांदीमुख्यः भूर्भुवः स्वः कृतस्य
नांदीश्राद्धस्यफलप्रतिष्ठासिध्यर्थंद्राक्षामलकयवमूलनिष्क्रयणींदक्षिणांदातुमहमु-
त्सृजे ॥ २ ॥ ॐ गोत्राः पितृपितामहप्रपितामहाः नांदीमुखाः भूर्भुवः स्वः कृ-
तस्य नांदीश्राद्धस्य फलप्रतिष्ठासिध्यर्थं द्राक्षामलकयवमूलनिष्क्रयणींदक्षिणां-
दातुमहमुत्सृजे ॥३॥ ॐ गोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्निकाः
नांदीमुखाः भूर्भुवः स्वः कृतस्यनांदीश्राद्धस्यफलप्रतिष्ठासिध्यर्थं द्राक्षामलकय-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

वमूलनिष्क्रयणींदक्षिणांदातुमहमुत्सृजे ॥ ४ ॥ ॐ उपास्मैगायतानरः पव-
मानाऽयेन्दवे ॥ अभिदेवाँऽइयक्षते ॥ १ ॥ इडामग्नेपुरुद ६. स ६. सनिंगोः
शश्वत्तम ६. हवमानायसाध ॥ स्यान्नः सूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे २
अनेननांदीश्राद्धंसंपन्नं ॥ सुसंपन्नं तेनश्रीकर्मांगदेवताः प्रीयंतांवृद्धिः विश्वेदेवाः
प्रीयंतां ॥ ॐ वाजेवाजेवतवाजिनोनोधनेषुविप्राअमृताऋतज्ञाः ॥ अस्यमध्वः
पिबतमादयध्वं तृप्यतयातपथिभिर्देवयानैः इति विसृज्य ॐ आमावाजस्य
प्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे ॥ आमागन्तांपितरामातराचामासोमो-
अमृतत्वेनगम्यात् ॥ इति नान्दीश्राद्धप्रयोगः ॥ अथाचार्यादिवरणम् ॥ उदङ्मु-
खमाचार्यमुपवेश्यगन्धादिभिः संपूज्य ॥ ॐ अमुकगोत्रोत्पन्नः अमुकप्रवरा-
न्वितः अमुकशर्मायजमानोहं अमुकगोत्रोत्पन्नं अमुकप्रवरान्वितं शुक्लयजुर्वे-
दान्तर्गतवाजसनेयमाध्यंदिनीयशाखाध्यायिनं अमुकशर्माणंब्राह्मणं अस्मिन्ग्रह-
शांत्याख्येकर्मणिएभिर्वरणद्रव्यैः आचार्यत्वेनत्वामहंवृणे ॥ वृतोस्मि इति प्रति-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वतिवचनं ॥ आचार्यस्तुयथास्वर्गेशक्रादीनांबृहस्पतिः ॥ तथात्वंममयज्ञेस्मिना-
चार्योभवसुव्रत ॥ १ ॥ अस्मिन् ग्रहशांत्याख्येकर्मणिएभिर्वरणद्रव्यैः अमुकगो-
त्रममुकशर्माणं ब्राह्मणं ब्रह्मत्वेनत्वामहंवृणे ॥ वृतोस्मि यथाचतुर्मुखोब्रह्मासर्व-
लोकपितामहः ॥ तथात्वंममयज्ञेस्मिन् ब्रह्माभवद्विजोत्तम ॥ २ ॥ अस्मिन्०
सदस्यत्वेनत्वामहं वृणे ॥ भगवन्सर्वधर्मज्ञसर्वधर्मभृतांवर ॥ विततेममयज्ञेस्मि-
न्सदस्योभवसुव्रत ॥ ३ ॥ अस्मिन्० गाणपत्यत्वेनत्वामहंवृणे ॥ वांछितार्थ-
फलावाप्त्यैपूजितोसिसुरासुरैः ॥ निर्विघ्नंक्रतुसंसिध्यैत्वामहंगणपंवृणे ॥ ४ ॥
अस्मिन्० उपद्रष्टत्वेनत्वा महंवृणे ॥ भगवन्सर्वधर्मज्ञसर्वधर्मपरायण ॥ विततेमम-
यज्ञेस्मिनुपद्रष्टाभवद्विज ॥ ५ ॥ अस्मिन्० ऋत्विकूत्वेनत्वामहंवृणे ॥
भगवन्सर्वधर्मज्ञसर्वधर्मपरायण । विततेममयज्ञेस्मिन्नृत्विकूत्वंमेमखेभव ॥ ६ ॥
ॐ व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणां ॥ दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्य-
माप्यते अथ करसंपुटंकृत्वासर्वान्प्रार्थयेत् अस्मिन्कर्मणियेयेतुवृतागुरुमु-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

खादयः ॥ सावधानाः प्रकुर्वन्तुस्वंस्वंकर्मयथोदितं ॥ १ ॥ अस्ययागस्य-
प्र. शा. निष्पत्तौभवन्तोभ्यर्थितामया ॥ सुप्रसन्नैः प्रकर्तव्यंकर्मेदंविधिपूर्वकम् ॥ २ ॥
॥ १९ ॥ यथाविहितंकर्मकुरु ॥ यथाज्ञानंकरवाणि इत्याचार्यादिवरणं आचार्यः
आचम्यप्राणानायम्यदेशकालौसंकीर्त्यअस्मिन्ग्रहशांत्याख्येकर्मणियजमानेनवृ
तोहंआचार्यकर्मकरिष्ये० आचार्योवामहस्तेगौरसर्षपान् गृहीत्वादिग्रक्षणंकुर्यात्
तत्रमंत्राः रक्षोहणंवलगहनंवैष्णवीमिदमहंतंवलगमुत्किरामियम्मेनिष्ट्योयममा-
त्योनिचखानेदमहंतंवलगमुत्किरामियम्मेसमानोयमसमानोनिचखानेदमहंतंव-
लगमुत्किरामियम्मेसबन्धुर्यमसबन्धुर्निचखानेदमहंतंवलगमुत्किरामियम्मेसजा-
तोयमसजातोनिचखानोत्कृत्याङ्किरामि ॥ १ ॥ रक्षोहणोवोवलगहनः प्रोक्षामि-
वैष्णवान्रक्षोहणोवोवलगहनोवनयामिवैष्णवान्रक्षोहणोवोवलगहनोवस्तृणा-
मिवैष्णवान्रक्षोहणौवांवलगहनाऽउपदधामिवैष्णवीरक्षोहणौवांवलगहनौपर्यू- रामः
हामिवैष्णवीवैष्णवमसिवैष्णवास्थ ॥ २ ॥ रक्षसांभागोसिनिरस्त ६. रक्षऽइ- ॥ १९ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दमह ६. रक्षोभितिष्ठामीदमह ६. रक्षोबबाधऽ इदमह ६. रक्षोधमन्तमोन-
यामि ॥ घृतेनद्यावापृथिवीप्रोर्णुवाथांवायोवेस्तोकानामाग्निराज्यस्यवेतु स्वाहा
स्वाहा कृतेऽऊर्ध्वनभसंमारुतंगच्छतम् ॥ ३ ॥ रक्षोहाविश्वचर्षणिरभियोनिम-
योहते ॥ द्रोणेसधस्थमासदत् ॥ ४ ॥ यदंत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा ॥
स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु ॥ १ ॥ अपसर्पंतुतेभूतायेभूताभूमिसं-
स्थिताः ॥ येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया॥२॥ अप क्रामंतुभूतानिपिशाचा-
स्सर्वतोदिशम्॥ सर्वेषामाविरोधेनशांतिकर्मसमारभे ॥ ३ ॥ भूतानिराक्षसावापि-
येत्रतिष्ठन्तिकेचन ॥ तेसर्वेप्यपगच्छन्तुग्रहयागंकरोम्यहं ॥ ४ ॥ इति तिष्ठन्
पूर्वादिदिक्षुविकिरेत् उदकोपस्पर्शः ततः पञ्चगव्यकरणं ॥ गायत्र्यागोमूत्रं ॥ ॐ
तत्स० गंधद्वारेतिगोमयम् ॥ ॐ गंधद्वारांदुराधर्षां नित्यपुष्टांकरीषिणीं ॥ ईश्व-
रींसर्वभूतानांतामिहोपह्वयेश्रियम् ॥ २ ॥ आप्यायस्वेतिपयः ॐ आप्यायस्वस
मेतुतेविश्वतः सोमवृष्ण्यम् ॥ भवाब्बाजस्यसंगथे ॥ ३ ॥ दधिक्राव्ण इतिदधि

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

प्र. शा.
॥ २० ॥

ॐ दधिक्राव्णो॰त् ॥ ४ ॥ तेजोसीत्याज्यं ॐ तेजोसिशुक्रमस्यमृतमसिधाम-
नामासिप्रियंदेवानामनाधृष्टन्देवयजनमसि ॥ ५ ॥ देवस्यत्वेतिकुशोदकं ॐ दे-
वस्यत्वा॰ ॥ ६ ॥ ॐ प्रणवेनयज्ञकाष्ठेनालोड्यआपोहिष्ठेतित्रिभिर्मंत्रैः कर्मभूमिं-
यज्ञसंभारांश्चप्रोक्षयेत्॰ ततः कृतांजलिःस्वस्तिन॰ ॥ २ ॥ इतिमन्त्रद्वयं पठेत्॰
भूमौप्रादेशंकृत्वा देवाः आयांतु॰ या तुधानाअपयांतु॰ विष्णोर्देवजनंरक्षस्व ततः
सर्वतोभद्रदेवतास्थापनंपूजनंसर्वतोभद्रेकलशस्थापनाविधिनाकलशंसंस्थाप्यकल-
शेप्रधानप्रतिमांसंस्थाप्याविधिनापूजयेत् ॥ततोग्निस्थापनं कुण्डेस्थंडिलेवा॥कुण्डं-
चेत्उपरिमेखलायांश्वेतवर्णंविष्णुंपूजयेत् इदंवि॰ इतिमन्त्रेण ॥ मध्यमेखलायां-
रक्तवर्णंब्रह्मयज्ञा॰इतिमं॰ब्रह्माणंसंपूज्य ॥ अधोमेखलायांकृष्णवर्णंनमस्ते॰ इति
रुद्रंसंपूज्य अम्बेअम्बि॰ इतिमं॰ योन्यांरक्तवर्णांगौरींपूजपेत् ॥ अस्मिन् ग्रहशां-
त्याख्येकर्मणिपंचभूः संस्कारपूर्वकमग्निस्थापनंकरिष्ये ॥ दर्भैः परिसमुह्य॰ गोम-
योदकेनोपलिप्य ॥ स्रुवेणोल्लिख्य ॥ अनामिकाङ्गुष्ठेनोधृत्य ॥ उदकेनाभ्युक्ष्य ॐ

CC-0 Jangamwadi Math Collection. Digitized by eGangotri

राम:
॥ २० ॥

अग्निंदूतमित्यग्निंस्थापयेत् ॥ अथ सूर्यादिग्रहाणांस्थापनक्रमः ॥ इशानेमण्डलंकृत्वाग्रहाणांस्थापनंततः ॥ वृत्तमंडलमादित्यंअर्धचन्द्रंनिशाकरं ॥ त्रिकोणंमंगलंचैवबुधं च धनुषाकृतिं ॥ गुरुमष्टदलंप्रोक्तंचतुःकोणं च भार्गवं ॥ नराकृतिंशनिंविद्याद्राहुं च मकराकृतिं ॥ केतुंखड्गसमंज्ञेयंग्रहमंडलकेशुभे ॥१॥ अथवा ॥ वृत्तमंडलमादित्यं चतुरस्त्रंनिशाकरं ॥ त्रिकोणंमंगलंचैवबुधेवैवाणसन्निभं ॥ गुरवेपाट्टिशाकारं पंचकोणंभृगुस्तथा मन्देचधनुषाकारं सूर्पाकारंतुराहवे ॥ केतवेचध्वजाकारंमंडलानिक्रमेणतु ॥ शुक्रार्कौप्राङ्मुखौज्ञेयौगुरुसौम्यौउदङ्मुखौ ॥ प्रत्यङ्मुखौ शनी सोमौशेषादक्षिणतोमुखाः ॥ मध्येतुभास्करंविंद्याच्छशिनंपूर्वदक्षिणे ॥ दक्षिणेलोहितंविंद्याद्बुधंपूर्वोत्तरेणतु ॥ उत्तरेणगुरुंविंद्यात्पूर्वेणैवतुभार्गवम् ॥ पश्चिमेतुशनिंविंद्याद्राहुं दक्षिणपश्चिमे ॥ पश्चिमोत्तरतंकेतुंइत्येषाग्रहसंस्थितिः ॥ आदित्याभिमुखास्सर्वेसाधिप्रत्यधिदेवताः॥ अधिदेवतादक्षिणेवामेप्रत्यधिदेवताः॥ अरुणौसूर्यभौमौचश्वेतशुक्रौनिशाकरौ ॥ हरितवर्णोबुधश्चैवपीतवर्णोगुरुस्तथा ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

कृष्णवर्णोशनीराह्न केतवस्तुतथैव च ॥ ततः पूर्वनिर्मितग्रहवेद्यांश्वेतवस्त्रंप्रसार्य-
नवग्रहमंडलंविलिख्यमध्यादिकोष्टेषुउक्तदिक्षुविदिक्षुसूर्यादिग्रहाणांस्थापनंपूजनं
च कुर्यात् । अथ सूर्याद्यावाहनं ॐ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतं
मर्त्यंच ॥ हिरण्य येनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ १ ॥ ॐ भूर्भुवः
स्वः कलिंगदेशोद्भवकाश्यपसगोत्ररक्तवर्णभोसूर्यइहागच्छइहतिष्ठसूर्यायनमः सूर्य-
मावाहयामिस्थापयामि ॥ १ ॥ ॐ इमंदेवाऽअसपत्न ६. सुवध्वंमहतेक्षत्रा-
यमहतेज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्येंद्रियाय ॥ इमममुष्यपुत्रममुष्यैपुत्र-
मस्यैविशऽएषवोमीराजासोमोस्माकंब्राह्मणाना ६. राजा ॥ २ ॥ ॐ भू०
यमुनातीरोद्भवआत्रेयसगोत्रशुक्लवर्णभोसोमइहागच्छेहतिष्ठसोमायनमः सोममा-
वाहयामिस्थापयामि ॥ २ ॥ ॐ अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्याऽअयम् ॥
अपा ६. रेता ६. सिजिन्वति ॥ ॐ भू० अवंतिकापुरोद्भवभारद्वाजसगो-
त्ररक्तवर्णभोभौमइ० भौमाय० भौमं० ॥ ३ ॥ ॐ उद्बुध्यस्वाग्नेप्रतिजागृ-

CC-0 Jangamwadi Math Collection. Digitized by eGangotri

हित्वमिष्टापूर्तेस ६. सृजेथामयं च ॥ अस्मिन्सधस्थे ऽअध्युत्तरस्मिन्विश्वे-
देवायजमानश्चसीदत ॥ ॐ भू० मगधदेशोद्भवआत्रेयसगोत्रहरितवर्णाभो-
बुधइ० बुधाय० बुधमा० ॥ ४ ॥ ॐ बृहस्पते ऽअतियदर्यो ऽअर्हाद्युमद्वि-
भातिक्रतुमज्जनेषु ॥ यद्दीदयच्छ्वस ऽऋतप्रजाततदस्मासुद्रविणंधेहिचित्रम् ॥
ॐ भू० सिंधुदेशोद्भवआंगिरसगोत्रपीतवर्णाभोबृहस्पतेइ० बृहस्पतये० बृहस्प-
तिं० ॥ ५ ॥ ॐ अन्नात्परिस्रुतोरसंब्रह्मणाव्यपिवत्क्षत्रंपयः सोमंप्रजापतिः ॥
ऋतेनसत्यमिन्द्रियंविपान ६. शुक्रमंधस ऽ इन्द्रस्येन्द्रियमिदंपयोमृतंमधु ॐ भू०
भोजकटदेशोद्भवभार्गवसगोत्रशुक्लवर्णभोशुक्रइ० शुक्राय० शुक्रं० ॥ ६ ॥ ॐ
शन्नोदेवीरभिष्टय ऽआपोभवंतुपीतये ॥ शंय्योरभिस्रवंतुनः ॐ भू० सौराष्ट्रदेशो-
द्भवकाश्यपसगोत्रकृष्णवर्णभोशनैश्चरइ० शनैश्चराय० शनैश्चरं० ॥ ७ ॥ ॐ
कयानश्चित्र ऽआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॐ भू० राठिनापु-
रोद्भवपैठिनसगोत्रकृष्णवर्णाभोराहोइ० राहवे० राहुं० ॥ ८ ॥ ॐ केतुंकृण्वंनकेत-

CC-0 Jangamwadi Math Collection. Digitized by eGangotri

वेपेशोमर्याऽअपेशसे ॥ समुखद्भिरजायथाः ॐ भू० अंतर्वेदिसमुद्भवजैमिन-
सगोत्रकृष्णावर्णभोकेतोइ० केतवे० केतुं० ॥६॥ ततोधिदेवतास्थापनंग्रहदक्षि-
णापार्श्वे ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीय-
मामृतात् ॥ ॐ भू० ईश्वरेहा० ईश्वराय० ईश्वरं० ॥ १ ॥ ॐ श्रीश्चते० ण
ॐ भू० उमेहा० उमायै० उमां० ॥ २ ॥ ॐ यदक्रंदः प्रथमंजायमानऽउद्य-
न्त्समुद्रादुतवापुरीखात् ॥ श्येनस्य पक्षाहरिणस्यबाहू उपस्तुत्यंमहियातन्ते
अर्वन् ॐ भू० स्कदेहा० स्कंदाय० स्कन्दं० ॥३॥ ॐ विष्णोरराटमसिविष्णोः
श्नप्त्रेस्थोविष्णोः स्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णवमसिविष्णवेत्वा ॥ ॐ
भू० विष्णोइ० विष्णवे० विष्णुं० ॥ ४ ॥ ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसी-
जायतामाराष्ट्रेराजन्यः शूरइषव्योतिव्याधीमहारथोजायतांदोग्ध्रीधेनुर्वोढानड्वा-
नाशुः सप्तिः पुरंधिर्योषाजिष्णूरथेष्ठाः ॥ सभेयोयुवास्ययजमानस्यवीरोजा-
यतांनिकामेनिकामेनः पर्जन्योवर्षतुफलवत्योनऽओ षधयः पच्यंतांयोगक्षेमोनः-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

कल्पताम् ॐ भू० ब्रह्मन् इ० ब्रह्मणे० ब्रह्माणं० ॥ ५ ॥ ॐ सयोषाऽइ-
न्द्रसगणोमरुद्भिः सोमंपिव वृत्रहा शूरविद्वान् ॥ जहिशत्रून् २ रपमृधोनुदस्वा-
थाभयंकृणुहिविश्वतोनः ॐ भू० इन्द्रेहा० इन्द्राय० इंद्रं०॥६॥ॐ यमायत्वांगिर-
स्वते पितृमतेस्वाहास्वाहाघर्मायस्वाहाघर्मः पित्रे ॥ ॐ भू० यमइ० यमाय०
यमं० ॥७॥ ॐ कार्षिरसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि ॥ समापोऽअद्भिरग्मतस-
मोषधीभिरोषधीः ॐ भू० कालेहा० कालाय० कालं० ॥८॥ ॐ चित्रावसोस्वस्ति-
तेपारमशीय ॐ भू० चित्रगुप्तेहा० चित्रगुप्ताय० चित्रगुप्तं० ॥९॥ ततः प्रत्यधिदे-
वतास्थापनंग्रहवामपार्श्वे ॐ अग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवे ॥ देवांऽआसादया-
दिह १ ॐ भू० अग्नेइ० अग्नये० अग्निं० ॥१॥ ॐ आपोहिष्ठा० ॐ भू० अपइहा-
गच्छतइहतिष्ठतअद्भ्यो नः० अपः आ० ॥२॥ ॐ स्योनापृथिवि० ॐ भू० पृथिविइ०
पृथिव्यै०पृथिवीं० ॥३॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपा ६.
सुरेस्वाहा ॐ भू० विष्णोइ० विष्णवे० विष्णुं० ॥४॥ ॐ इन्द्र आसान्नेतावृहस्पति-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अ. शा. दक्षिणायज्ञः पुरएतुसोमः ॥ देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रम्
ॐ भू० इन्द्रेहा०इन्द्राय०इन्द्रं०॥५॥ॐ अदित्यैरास्नासीन्द्राण्याउष्णीषः॥ पूषासि-
॥ २३ ॥ घर्मायदीष्व ॐ भू०इन्द्राणिइ०इन्द्राण्यै०इन्द्राणीं०॥६॥ ॐ प्रजापतेनत्वदेतान्य-
न्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवय ६. स्यामपत-
योरयीणाम् ॐ भू० प्रजापतेइ० प्रजापतये० प्रजापतिं० ॥७॥ ॐ नमोस्तुसर्पे-
भ्योयेके च पृथिवीमनु ॥ येऽअंतरिक्षेयेदिवितेभ्यः सर्पेभ्योनमः ॐ भू० सर्पाः
इहागच्छतइहतिष्ठत० सर्प्येभ्यो० सर्पान्० ॥८॥ ॐ ब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसी-
मतः सुरुचोवेनआवः ॥ सबुध्न्याउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः ॐ
भू० ब्रह्मन्इ० ब्रह्मणे० ब्रह्माणं० ॥९॥ ततोविनायकादिपंचलोकपालदेवताः वा-
स्तोष्पतिंक्षेत्रपालंचावाहयेत् ॐ गणानांत्वा० ॐ भू० गणपतेइ० गणपतये०
गणपतिं० १ ॐ अंबेऽअंबिके० ॐ भू० दूर्गेइ० दुर्गायै० दुर्गां० २ ॐ वायोजे- रामः
CC-0.Jangamwadi Math Collection. Digitized by eGangotri
तेसहस्रिणोरथासस्तेभिरागहि ॥ नियुत्वान्सोमपीतये ॐ भू० वायोइ० वायवे० ॥ २३ ॥

वायुं० ३ ॐ घृतंघृतपावानः पिवतव्वसांवसापावानः पिवतांतरिक्षस्यहविरसिस्वा-
हा ॥ दिशः प्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्यः स्वाहा० ॐ भू० आका
शइहा० आकाशाय० आकाशं० ४ ॐ यावांकशामधुमत्यश्विनासूनृतावती ॥
तयायज्ञंमिमिक्षताम् ॐ भू० अश्विनौ इहागच्छतं इहतिष्ठतं अश्विभ्यांनमः अश्वि-
नौआवाहयामि० ५ ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोऽअनमीवोभवानः ॥
यत्वेमहेप्रतितन्नोजुषस्वशन्नोभवद्विपदेशंचतुष्पदे ॥ ॐ भू० वास्तोष्पतेइ० वा-
स्तोष्पतये० वास्तोष्पतिं० ६ ॐ नहिस्पशमविदंनन्यमस्माद्वैश्वानरात्पुरऽएता-
रमग्नेः ॥ एमेनमवृधन्नमृताअमर्त्यंवैश्वानरंक्षैत्रजित्यायदेवाः ॐ भू० क्षेत्राधिप-
तेइ० क्षेत्राधिपतये० क्षेत्राधिपतिमावा० ७ अथमंडलाद्बाह्येदशादिक्पालानावा-
हयेत् ॐ त्रातारमिन्द्रमवितारमिन्द्र ६. हवेहवेसुहव ६. शूरमिन्द्रम् ॥ ह्वया-
मिशक्रंपुरुहूतमिन्द्र ६. स्वस्तिनोमघवाधात्विन्द्रः ॐ भू० इन्द्रेहा० इन्द्राय०
इन्द्रं० १ ॐ त्वन्नोअग्नेतवदेवपायुभिर्मघोनोरक्षतन्वश्चवंद्य ॥ त्राताताोकस्यत-

अ. शा. नयेगवामस्यनिमेष ठ. रक्षमाणास्तवव्रते ॐ भू० अग्नेइ० अग्नये० अग्निं० २

॥ २४ ॥ ॐ यमायत्वांगिरस्वतोपितृ० ॐ भू० यमेहा० यमाय० यमं० ३ ॐ असुंन्वंत-

यजमानमिच्छस्तेनस्येत्यामन्विहित स्करस्य ॥ अन्यमस्मदिच्छसात ऽइत्यानमो-

देविनिर्ऋतेतुभ्यमस्तु ॥ ॐ भू० निर्ऋतेइ० निर्ऋतये० निर्ऋतिं० ४ ॐ तत्वा-

यामि० ॐ भू० वरुणइ० वरुणाय० वरुणं० ५ ॐ आनोनियुद्भिःशतिनीभिर-

ध्वर ६. सहस्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअस्मिन्सवनेमादयस्वयूयम्पातस्व-

स्तिभिः सदानः ॐ भू० वायोइ० वायवे० वायुं० ६ ॐ वय ठ. सोमव्रतेतव-

मनस्तनूषुविभ्रतः प्रजावंतःसचेमहि ॥ ॐ भू० सोमेहा० सोमाय० सोमं० ७ ॐ

तमीशानंज० ॐ भू० ईशानेहा० ईशानाय० ईशानं० ८ ॐ अस्मेरुद्रामेहनाप-

र्वतासोवृत्रहत्येभरहूतौसयोषाः ॥ यः श ६. सतेस्तुवतेधायिपज्रऽइन्द्रज्येष्ठाऽअ-

स्माँऽअवन्तुदेवाः ॥ पूर्वेशानयोर्मध्ये ॥ ॐ भू० ब्रह्मन्० ब्रह्मणे० ब्रह्माणं० ॥९॥ रामः

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ॐ स्योनापृथिवि० निर्ऋतिपश्चिमयोर्मध्ये ॥ ॐ भू० अनन्तेहा० अनन्ताय० ॥ २४ ॥

अनन्तं० ॥१०॥ ॐ मनोजूतिर्जु० ॐ सूर्यादिअनन्तांत देवताः सुप्रतिष्ठिताः वरदाःभवन्तु ॥ सूर्यादिअनन्तान्तदेवताभ्योनम इति मन्त्रेण आसनाद्युपचारैः प्रत्येकमेक त्रवाकांडानुसमयेनपदार्थानुसमयेनवाषोडशोपचारैःसंपूज्यप्रार्थयेत् ॥ ग्रहा ऽऊर्याहुतयोव्यंतोविप्रा यमातिम् ॥ तेषांविशिप्रियाणांवोहमिषमूर्ज ६. समग्रभमुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृन्हाम्येषतेयोनिरिन्द्रायत्वाजु ष्टतमम् ॥ ग्रहस्येशानदिग्भागे कलशस्थापनविधिनारुद्रकलशंसंस्थाप्यकलशेवरुणंअसंख्यातरुद्रांश्चावाह्यपूजयेत् ॥ॐ असंख्यातासहस्राणियेरुद्रा ऽअधिभूम्याम् ॥ तेषा ६. सहस्रयोजनेवधन्वानितन्मसि ॥ असंख्यातरुद्रेभ्यो० असंख्यातरुद्राना० अथ कुशकंडिकाकरणं ॥ अग्नेर्दक्षिणतोब्रह्मासनं ॥ अग्नेरुत्तरतः प्रणीतासनद्वयं ॥ ब्रह्मासनेब्रह्मोपवेशनं ॥ यावत्कर्मसमाप्यतेतावत्त्वंब्रह्माभव ॥ भवामीतिप्रतिवचनम् ॥ ब्रह्मानुज्ञातः प्रणीताप्रणयनं ॥ प्रणय ॥ ईशानादिपूर्वाग्रैः कुशैः परिस्तरणं ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

आग्नेयादीशानांतं ॥ ब्रह्मणोग्निपर्यंत ॥ नैर्ऋत्याद्वायव्यान्तं ॥ अग्नितः प्रणीताप-

यैतं ॥ अथपात्रासादनं ॥ पश्चादुत्तरतोवास्यात् ॥ त्रीणिपवित्रेद्वे ॥ प्रोक्षणीपात्रं ॥ आज्यस्थाली ॥ चरुस्थाली ॥ संमार्गकुशाःपंच ॥ उपयमनकुशाःसप्त ॥ समिधस्तिस्रः ॥ स्रुवः ॥ आज्यं ॥ तण्डुलाः ॥ पूर्णपात्रं ॥ वृषनिष्क्रयदक्षिणा ॥ उपकल्पनीयानिद्रव्याणिनिधाय ॥ पवित्रच्छेदनानि ॥ द्वयोरुपरित्रीणि निधाय ॥ द्वौमूलेनप्रदक्षिणीकृत्य ॥ त्रिभिश्छिद्य ॥ द्वौग्राह्यौ त्रिस्त्याज्यः ॥ प्रोक्षणीपात्रप्रणीतोदकमासिच्य ॥ त्रिः पूर्णं ॥ पवित्राभ्यामुत्पवनं ॥ प्रोक्षण्याःसव्यहस्तकरणं ॥ दक्षिणेनोद्दिङ्गनं ॥ प्रणीतोदकेनप्रोक्षणीनांप्रोक्षणं ॥ प्रोक्षण्युदकेनआज्यस्थाल्याः प्रोक्षणं ॥ चरुस्थाल्याः प्रो० ॥ संमार्गकुशानांप्रो० ॥ उपयमनकुशानांप्रो० ॥ समिधांप्रो० ॥ स्रुवस्यप्रो० ॥ आज्यस्यप्रो० ॥ तण्डुलानांप्रो० ॥ पूर्णपात्रस्यप्रो० ॥ उपकल्पनीयानांपदार्थानांप्रो० ॥ असंचरेनिधानं ॥ प्रणीताग्नयोर्मध्ये ॥ आज्यस्थाल्यामाज्यनिर्वापः ॥ चरुस्थाल्यांप्रणीतोदकासेकपूर्व कंतण्डुलप्रक्षेपः ॥ ब्रह्मादक्षिणतऽआज्याधिश्रयणं ॥ चरोरधिश्रयणमाज्यस्योत्तरतः ॥ ज्वलदुल्मुकेनो-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

भयोः पर्यग्निकरणं ॥ इतरथावृत्तिः ॥ उदकोपस्पर्शः ॥ अर्धश्रितेचरौ अधोमुख-
स्यस्त्रुवस्यप्रतपनं ॥ संमार्गकुशैः स्त्रुवस्योर्ध्वमुखस्यसंमार्जनं ॥ बुध्न्यादारभ्य-
कुशैरग्रपर्यंतंसंमृज्य अग्रादारभ्य अधस्तान्मूलैर्मूलांतं॥ प्रणीतोदकेनाभ्युक्षणं॥
पुनःप्रतपनं ॥ दक्षिणदेशेनिधानं ॥ आज्योद्वासनं ॥ चरुपूर्वेणानी याग्नेरुतरतः
स्थापयेत् ॥ चरोरुद्वासनं ॥ अग्नेरुत्तरतएवाज्यंप्रदक्षिणीकृत्यआज्यस्योत्तरतः
चरुंस्थापयेत् ॥ आज्योत्पवनं ॥ आज्यावेक्षणं ॥ अपद्रव्यनिरसनं ॥ प्रोक्ष-
ण्युत्पवनं ॥ उपयमनकुशादानं ॥ तिष्ठत्समिदाधानं ॥ प्रोक्षण्युदकेनसपवित्रह-
स्तेनईशानादिअग्नेः प्रदक्षिणंपर्युक्षणं ॥ पवित्रयोः प्रणीतासुनिधानं ॥ दक्षिणं-
जान्वाच्य ॥ ब्रह्मणाकुशैरन्वारब्धः ॥ स्त्रुवेणाज्यहोमः ॥ अग्नेरुत्तरभागे ॥ ॐ-
प्रजापतयेस्वाहा ॥ इदंप्रजापतयेनमम ॥ अग्नेर्दक्षिणभागे ॥ ॐ इन्द्रायस्वाहा-
इदमिंद्रायनमम॥ समिद्धतमे ॥ ॐ अग्नयेस्वाहा ॥ इदमग्नयेनमम ॥ ॐ सोमाय-
CC-0.Jangamwadi Math Collection. Digitized by eGangotri
स्वाहा ॥ इदंसोमायनमम ॥ ततः सूर्यादिग्रहाणांअधिदेवताप्रत्यधिदेवतागणप-

त्यादिपंचलोकपालदेवतानांइन्द्रादिदश दिक्पालदेवतानांचप्रत्येकंसमित्तिलचर्वा-
ज्यद्रव्यैः अष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिमष्टौवाजुहुयात् ॥ अस्मिन्ग्रहशां-
तिकर्मणिइमानिहवनीयद्रव्याणियायायक्ष्माणदेवतास्ताभ्यस्ताभ्यः मयापरित्य-
क्तंनमम ॥ यथादैवतमस्तु ॥ इति कुशकंडिकाकरणं ॥ अथसूर्यादिनवग्रहाणां
प्रणवादिस्वाहांत होममन्त्राः ॥ ॐ गणानांत्वा० धम् स्वाहा ॐ अम्बेऽअ० नीम्-
स्वाहा ॥ १ ॥ ॐ आकृष्णे० पश्यन् स्वाहा ॥ १ ॥ ॐ इमन्दे वाअ० राजा
स्वाहा ॥ २ ॥ ॐ अग्निर्मू० न्वतिस्वाहा ॥ ३ ॥ ॐ उद्बुध्य० सीदतस्वाहा ॥ ४ ॥
ॐ बृहस्प० चित्रम्स्वाहा ॥ ५ ॥ ॐ अन्नात्प० मधुस्वाहा ॥ ६ ॥ ॐ
शंन्नोदे० तुनःस्वाहा ॥ ७ ॥ ॐ कयान० वृतास्वाहा ॥ ८ ॥ ॐ केतुङ्कृ०
यथास्वाहा ॥ ९ ॥ त्र्यम्बकं० मृतात्स्वाहा ॥ १० ॥ श्रीश्चते० इषाणस्वा-
हा ॥ ११ ॥ यदक्रन्दः० अर्वन्स्वाहा ॥ १२ ॥ विष्णोररा० वेत्वास्वाहा ॥ १३ ॥
आब्रह्म० ताम्स्वाहा ॥ १४ ॥ सजोषा० तोनःस्वाहा ॥ १५ ॥ यमायत्वां०

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

पित्रेस्वाहा ॥ १६ ॥ कार्षिर० षधीःस्वाहा ॥ १७ ॥ चित्राव० शीयस्वाहा ॥१८॥
अग्निन्दू० दिहस्वाहा ॥ १९ ॥ आपोहि० यचक्षसेस्वाहा ॥ २० ॥ स्योनापृ०
प्रथाःस्वाहा ॥ २१ ॥ इदम्बि० सुरेस्वाहा ॥ २२ ॥ इन्द्रआ० ग्रमस्वाहा ॥२३॥
अदित्यै० दीष्वस्वाहा ॥ २४ ॥ प्रजापते० णाम्स्वाहा ॥ २५ ॥ नमोस्तुस०
नमःस्वाहा ॥ २६ ॥ ब्रह्मय० विवःस्वहा ॥ २७ ॥ गणाना० धम्स्वाहा ॥२८॥
अम्बेऽअ०नीम्स्वाहा ॥ २९ ॥ वायोजेते०तयेस्वाहा ॥ ३० ॥ घृतंघृत० दिग्भ्यः
स्वाहा ॥ ३१ ॥ यावांक० ताम्स्वाहा ॥ ३२ ॥ वास्तोष्पते० ष्पदेस्वाहा॥३३॥
नहिस्पश० देवाः स्वाहा ॥ ३४ ॥ त्रातारमि० त्विन्द्रः स्वाहा ॥ ३५ ॥ त्वन्नोअग्ने०
व्रतेस्वाहा ॥ ३६ ॥ यमायत्वां० पित्रेस्वाहा ॥ ३७ ॥ असुन्वंत० मस्तु-
स्वाहा ॥३८॥ तत्वाया० मोषीः स्वाहा ॥ ३९ ॥ आनोनि० दानः स्वाहा ॥४०॥
वय ६. सो० महिस्वहा ॥ ४१ ॥ तमीशानं० स्तयेस्वाहा ॥ ४२ ॥ अस्मेरुद्रा०
CC-0.Jangamwadi Math Collection. Digitized by eGangotri
देवाः स्वाहा० ॥ ४३ ॥ स्योनापृ० प्रथाः स्वाहा ॥ ४४ ॥ ततः प्रधानहोमः ॥

अ. शा. प्रधानहोमानन्तरं ब्रह्मादिमण्डलदेवताश्च एकैकयाज्याहुत्यायक्षेशेषणास्विष्ट-
कृदादिहोमः ॐ अग्नेनयसुपथारायेऽअस्मान्विश्वा निदेववयुना निविद्वान्॥ युयो-
॥ २७ ॥ ध्यस्मज्जु हुराणमेनोभूयि ष्ठान्तेनमऽउक्तिंविधेम ॥ १ ॥ ॐ स्वाहा स्वधायु-
ताग्नयेवैश्वानरायनम इतिमंत्रेणाग्निंसंपूज्य ॥ ततोहुतशेषद्रव्यंगृहीत्वा ॥
ब्रह्मणान्वा रब्धः स्विष्टकृद्धोमंकुर्यात् ॥ ॐ अग्नयेस्विष्टकृतेस्वाहा ॥ इद-
मग्नयेस्विष्टकृतेनमम ॥ ततोभूरादिनवाहुतयः ॥ ॐ भूः स्वाहा ॥ इदमग्नये-
नमम ॥ ॐ भुवः स्वहाः ॥ इदं वायवेनमम ॐ स्वःस्वाहा ॥ इदं सूर्यायनमम ॥
ॐ त्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोवन्हितमः
शोशुचानोविश्वाद्वेषा ँ सिप्रमुमुग्ध्यस्मत्स्वाहा ॥ इद मग्नीवरुणाभ्यांनमम ॥
ॐ सत्वन्नोअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुण ँ
रराणोवीहिमृडीक ँ सुहवोनएऽधिस्वाहा ॥ इदमग्नीवरुणाभ्यांनमम ॥ ॐ
अयाश्चाग्नेस्यनभिशास्तिपाश्चसत्यमित्वमयाऽआसि ॥ अयानोयज्ञंवहास्ययानोधेहि- रामः ॥ २७ ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

भेषज ६. स्वाहा ॥ इदमग्नयेअयसेनमम ॥ ॐ येतेशतंवरुणायेसहस्रंयज्ञियाः पाशाविततामहान्तः ॥ तेभिर्न्नोऽअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतः स्वर्क्काः स्वाहा ॥ इदं वरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यः स्वर्केभ्यश्चन-मम ॥ ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यम ६. श्रथाय ॥ अथाव-यमादित्यव्रतेतवानागसोऽअदितयेस्यामस्वाहा ॥ इदं वरुणायादित्यायादितयेन-मम ॥ ॐ प्रजापतयेस्वहा ॥ इदं प्रजापतयेनमम ॥ इतिनवाहुतयः ॥ अग्न्या-यतनस्यसमंताद्दिक्षुविदिक्षुचदशदिक्पालानांसदीपमाषभक्तबलयोदेयाः ॥ ॐ त्रातारमिंद्र० त्विंद्रः इन्द्राय सांगायसपरिवारायसायुधायसशक्तिकायएतंसदी-पमाषभक्तबलिंसमर्पयामि ॥ भो इन्द्रस्वांदिशंरक्षबलिंभक्षममसकुटुंबस्यसप-रिवारस्य आयुः कर्ताक्षेमकर्ताशुभकर्ताशांतिकर्तापुष्टिकर्तातुष्टिकर्तावरदोभव । अनेनबलिदानेनइन्द्रः प्रीयताम् ॥ एवंसर्वत्र १ ॐ त्वन्नोअग्ने० अग्नयेसां० ॥ भोअग्नेदिशंरक्षबलिं० अ० अग्निः प्री० ॥२॥ ॐ यमायत्वां० पित्रे ॥ यमायसां०

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

मि ॥ भोयमदि० बलिं० अ० यमः प्री० ॥ ३ ॥ ॐ असुन्वंतम०
निर्ऋतयेसां० ॥ बलिं० मि० भोनिर्ऋतेदि० अ० निर्ऋतिः प्री० ॥ ४ ॥ ॐ
तत्वायामि० षीः वरुणायसां० ॥ भोवरुणादि० ॥ अ० ॥ वरुणः प्री० ॥ ५ ॥
ॐ आनोनियु० नः वायवेसां०मि० ॥ भोवायोदि० अ० वायुः प्री०॥६॥ ॐ वय
६. सोम० हि॥सोमायसां० भोसोमदि०बलिं०अ०सोमः प्री०॥७॥ॐ तमीशानं०
ये ॥ ईशानायसां० मि॥ भोईशानदि० अ० ईशानः प्री० ॥८॥ ॐ अस्मेरुद्रामे०
वाः॥ ब्रह्मणेसां० भि ॥ भोब्रह्मन्दि० अ० ब्रह्माप्री० ॥९॥ ॐ स्योनापृ० प्रथाः ।
अनंतायसां० मि॥ भोअनंतदि० बलिं० अ० अनंतः प्री० ॥ १० ॥ ततोग्रहवेदी-
समीपेग्रहादिभ्यः सदीपमाषभक्तबलयोदेयः ॐ आकृष्णेन० पश्यन् ॥ १ ॥
सूर्यायसांगायसपरिवारायसायुधायसशक्तिकायईश्वराग्निरूपाधिदेवताप्रत्यधिदेवता
सहितायएतंसदीपमाषभक्तबलिंसमर्पयामि । भोसूर्यइमंबलिंगृहाणममसकुटुंब-
स्यसपरिवारस्यआयुः कर्ताक्षेमकर्ता शुभकर्ता शांतिकर्तापुष्टिकर्तातुष्टिकर्तावर-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दोभव। अनेनबलिदानेनसूर्यः प्रीयताम् । १ । ॐ इमन्देवा० राजा ॥ सोमायसां० उमाऽरूपाधिदेवताप्रत्यधिदे० मि। भोसोमइमं बलिं० । अने० सोमः प्री० । २ ॐ अग्निर्मू० ति। भौमाय सां० स्कंदभूमिरूपाधिदेवताप्रत्यधिदे० मि । भो भौ। मइमं बलिं० । अनेन० भौमः प्री० ॥ ३ ॥ ॐ उद्बुध्यस्वा० त । बुधायसां० नारायणविष्णुरूपाधिदेवता प्रत्यधिदेवतास० मि। भोबुधइमं ब०। अने न० बुधः प्री० ४ । ॐ बृहस्पते० म् । बृहस्पतये सां० ब्रह्मेन्द्ररूपाधिदेवताप्रत्यधिदे० मि । भोबृहस्पतेइमं ब० । अनेन० बृहस्पतिः प्री० । ५ । ॐ अन्नात्परि० धु । शुक्रायसां० इन्द्रेन्द्राणीरूपाधिदेवताप्रत्यधिदे०मि । भोशुक्रइमं ब० । अनेन० शुक्रः प्री० ६ ॐ शन्नोदेवी० नः। शनैश्चरायसां० यमप्रजापतिरूपाधिदेवता-प्रत्यधिदे० मि । भोशनैश्चरइमं ब० । अनेन शनैश्चरः प्री० ७। ॐ क-यानश्चि० ता । राहवेसां० कालसर्परूपाधिदेवताप्रत्यधिदे० मि । भोराहो-इमं ब०। अनेन० राहुः प्री० । ८ । ॐ केतुं कृण्वं० था: । केतवेसां० चित्र-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अ. शा. गुप्तब्रह्मरूपाधिदेवताप्रत्यधिदे० मि। भोकेतोइमं ब० अनेन० केतुः प्री० ॥१॥
॥ २९ ॥ ॐ गणानांत्वा० म् । गणपतयेसां० मि । भोगणपतेइमं ब० । अनेन० ग-
णपतिः प्री० १ । ओं अम्बेऽअम्बिके० म् । दुर्गायैसांगायै० मि । भोदुर्गेइमं०
आयुः कार्त्रीक्षे०शां०पु०तु० वरदाभव। अनेन० दुर्गाप्री०। २। वायोजे० ये। वाय-
वेसां० मि ॥ भोवायोइमं ब० । अने० वायुः प्री० । ३ । ॐ घृतं घृत० हा॥
आकाशायसां० मि । भो आकाशइमं ब० अने० आकाशः प्री०। ४। ॐ
यावांकशा० म् । अश्विभ्यांसांगाभ्यां० मि। भोअश्विनौइमंबलिं गृन्हीतंमम०
आयुः कर्तारौ० वरदौभवतं। अ० अश्विनौप्रीयेतां ॥५॥ ॐ वास्तोष्पतेप्र० दे ।
वास्तोष्पतयेसां० मि॥ भोवास्तो ष्पतेइमं० अने० वास्तोष्पतिः प्री० ६ अथवादि- रामः
कूपालेभ्यएकतन्त्रेणैकमेवबालिंदद्यात् ॐ प्राच्यैदिशेस्वाहार्वाच्यैदिशेस्वाहादक्षि- ॥ २८ ॥
णायैदिशेस्वाहार्व्वाच्यैदिशेस्वाहाप्रतीच्यैदिशेस्वाहार्व्वाच्यैदिशेस्वाहोदीच्यैदिशेस्वा-
हार्व्वाच्यैदिशेस्वाहोर्द्धायैदिशेस्वाहार्व्वाच्यैदिशेस्वाहावाच्यैदिशेस्वाहार्व्वाच्यैदिशे-

CC-0 Jangamwadi Math Collection. Digitized by eGangotri

स्वाहा॥इन्द्रादिदशदिक्पालेभ्यः सांगेभ्यः स परिवारेभ्यः सायुधेभ्यःसशक्तिकेभ्यः एतान्सदीपमाषभक्तबलीन्समर्पयामि । भोभोइन्द्रादिदशदिक्पालाः सांगाः सपरिवाराः सायुधाः सशक्तिकाः ममस० आयुकर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः वरदाः भवत॥ अनेनबलिदानेन इन्द्रादिदशदिक्पालाः प्रीयंतां १ एवंसर्वेभ्योग्रहेभ्यःएकतन्त्रेणैकमेवबलिंदद्यात् । ॐ ग्रहाऊर्जा० म् । सूर्यादिनवग्रहेभ्यः सांगेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः अधिदेवताप्रत्यधिदेवतागणपत्यादिपञ्चलोकपालवास्तोष्पतिसाहितेभ्यः एतं सदीपमाषभक्तबलिंसमर्पयामि । भोभोसूर्यादिग्रहाः सांगाः सपरिवाराः सायुधाः सशक्तिकाः अधिदेवता प्रत्यधिदेवता गणपत्यादिपञ्चलोकपालवास्तोष्पतिसाहिताः ममसकुटुंबस्यसपरिवारस्यआयुः कर्तारः क्षेमकर्तारः शुभकर्तारः शान्तिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः वरदाः भवत॥ अनेनबलिदानेनसूर्यादिग्रहाः प्रीयन्ताम् । अथक्षेत्रपालबलिदानं । एकस्मिन्वंशादिपात्रेकुशानास्तीर्यतदुपरि आ-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हारचतुर्गुणांद्विगुणांवा माषभक्तदध्योदनंवा जलपात्रंचनिधायचतुर्मुखंदीपं प्रज्वा-
ल्यहरिद्राकुंकुमादिपताकायुतंकृत्वा । ॐ नहिस्पश० वा: क्षेत्रपालायनम-
इति संपूज्यप्रार्थयेत् । ॐ नमोक्षेत्रपालस्त्वंभूतप्रेतगणैसह ॥ पूजाबलिंगृहा-
णेमंसौम्योभवतुसर्वदा ॥ आयुरारोग्यमेदेहिनिर्विघ्नंकुरुसर्वदा ॥ ततोबलि-
दानं ॥ क्षेत्रपालायसांगायसपरिवारायसायुधायसशक्तिकायमारीगणभैरवराक्ष-
सकूष्माण्डवेतालभूतप्रेतपिशाचडाकिनीशाकिनीपिशाचिनीगणसाहितायएतं स-
दीपमाषभक्तबलिंसमर्पयामि ॥ भोक्षेत्रपालक्षेत्रंरक्षबलिंभक्षममसकुटुंबस्य
सपरिवारस्य आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदोभव। अने-
नबलिदानेनक्षेत्रपालः प्रीयताम् । यजमानस्यमस्तकोपरिसकृद्भ्रामयित्वा ।
अनेवक्षमाणेन दुर्ब्राह्मणेनशूद्रेणवाबालिं गृहीत्वा चतुष्पथेनिक्षिपेत् । ततोयजमान-
स्तस्य पृष्ठतोद्वारपर्यन्तं गत्वाजलं क्षिपेद्धिंकारेणेतिमन्त्रेण । ॐ हिङ्कारायस्वा-
CC-0. Jangamwadi Math Collection. Digitized by eGangotri
हाहिङ्कृतायस्वाहाक्रंदतेस्वाहावक्रन्दायस्वाहा प्रोथतेस्वाहाप्रप्रोथायस्वाहागन्धाय

घृतक्षुः ॥ ४ ॥ एता ऽअर्षन्तिहृद्यात्समुद्राच्छतव्रजारिपुणानावचक्षे ॥ घृतस्य
धारा ऽअभिचाकशीमिहिरण्ययोवेतसोमध्य ऽआसाम् ॥ ५ ॥ सम्यक्स्रवन्तिसरि-
तोनधेना ऽअन्तर्हृदामनसापूयमानाः ॥ एते ऽअर्षन्त्यूर्म्मयोघृतस्यमृगा ऽइवक्षिप-
णोरीषमाणाः ॥ ६ ॥ सिन्धोरिवप्राध्वनेशूघनासोवातप्रमियः पतयन्तियह्वाः ॥
घृतस्यधारा ऽअरुषोनवाजीकाष्ठाभिन्दन्नूर्म्मिभिः पिन्वमानः ॥ ७ ॥ अभिप्रव-
न्तसमनेवयोषाः कल्याण्यः स्मयमानासो ऽअग्निम् ॥ घृतस्यधाराः समिधोन-
सन्तताजुषाणोहर्य्यतिजातवेदाः ॥ ८ ॥ कन्या ऽइववहतुमेतवा ऽउ ऽअञ्ज्यञ्जाना-
ऽअभिचाकशीमि ॥ यत्रसोमः सूयतेयत्रयज्ञोघृतस्यधारा ऽअभितत्पवन्ते ॥ ९ ॥
अभ्यर्षतसुष्टुतिङ्गव्यमाजिमस्मासुभद्रा ऽद्रविणानिधत्त ॥ इमंयज्ञन्नयतदेवता-
नोघृतस्यधारामधुमत्पवन्ते ॥ १ ॥ धामन्तेविश्वम्भुवनमधिश्रितमन्तः समुद्रे-
हृद्यन्तरायुषि ॥ अपामनीकेसमिथेय ऽआभृतस्तमश्याममधुमन्तन्त ऽऊर्म्मिम् ११
पुनस्त्वादित्यारुद्रावसवः समिन्धतांपुनर्ब्रह्माणोवसुनीथयज्ञैः ॥ घृतेनत्वन्त-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अ. शा.
॥ ३१ ॥

स्वाहाघ्रातायस्वाहानिविष्टायस्वाहोपविष्टायस्वाहासन्दितायस्वाहावल्गतेस्वाहा-
सीनायस्वाहाशयानायस्वाहास्वपतेस्वाहाजाग्रतेस्वाहाकूजतेस्वाहाप्रबुद्धायस्वा-
हाविजृम्भमाणायस्वाहाविचृत्ताय स्वाहा स ६. हानायस्वाहोपस्थितायस्वाहाय-
नायस्वाहाप्प्रायणायस्वाहा ॥ यजमानः पाणिपादं प्रक्षाल्याचम्य ततः नारि
केलादिफलंरक्तवस्त्रवेष्टितं द्वादशशषट्चतुः स्रुवेणगृहीतमाज्यं स्रुच्यांकृत्वा ॐ
पूर्णाहुत्यैनम इति संपूज्य पूर्णाहुतिंजुहुयात् । तत्र मन्त्राः ॥ ॐ समुद्रा-
दूर्म्मिर्मधुमाँऽउदारदुपा ६. शुनासममृतत्वमानट् ॥ घृतस्यनामगुह्यंयदस्ति-
जिह्वादेवानाममृतस्यनाभिः ॥ १ ॥ व्वयन्नामप्रब्रवामाघृतस्यास्मिन्यज्ञेधारया-
मानमोभिः ॥ उपब्रह्माशृणवच्छस्यमानञ्चतुः शृङ्गोवमीद्गौरऽएतत् ॥ २ ॥
चत्वारिशृङ्गात्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य ॥ त्रिधाबद्धोवृषभोरो-
रवीतिमहोदेवोमर्त्याँऽआविवेश ॥ ३ ॥ त्रिधाहितम्पणिभिर्गुह्यमानङ्गविदेवा-
सोघृतमन्वविन्दन् ॥ इन्द्रऽएक ६. सूर्यऽएकञ्जजानव्वेनादेक ६. स्वधयानि-

रामः
॥ ३१ ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

न्वं॑वर्धयस्वसत्याः सन्तुयजमानस्यकामाः ॥ १२ ॥ सप्ततेऽअग्नेसमिधः सप्त-
जिह्वाः सप्तऽऋषयः सप्तधामप्रियाणि ॥ सप्तहोत्राः सप्तधात्वायजन्तिसप्तयो-
नीरापृणस्वघृतेनस्वाहा ॥ १३ ॥ मूर्द्धानंदिवोअरतिंपृथिव्याऽवैश्वानरऽमृतऽआ-
जातमग्निम् ॥ कवि ६. संम्राजमतिथि ञ्जनानामासन्नापात्रञ्जनयंतदेवाः॥ १४॥ पूर्णा-
दर्विपरापत सुपूर्णापुनरापत॥वस्नेवव्विक्रीणावहाऽइषमूर्ज ६. शतक्रतोस्वाहा॥१५॥
इदमग्नयेवैश्वानरायवसुरुद्रादित्येभ्यः शतक्रतवेसप्तवतेअग्नयेअद्भ्यश्चनमम ॥
ततोवसोर्द्धारांजुहुयात् ॥ तत्रमंत्राः ॥ ॐ सप्ततेअग्नेसमिधः स० ॥ १ ॥ शुक्र
ज्योतिश्चचित्रज्योतिश्चसत्यज्योतिश्चज्योष्मांश्च ॥ शुक्रश्चऽऋतपाश्चात्य ६.
हाः॥ २ ॥ ईदृङ्चान्यादृङ्सदृङ्प्रतिसदृङ् ॥ मितश्चसम्मितश्चसभराः॥ ३ ॥ ऋ-
तश्चसत्यश्चध्रुवश्चधरुणश्च ॥ धर्त्ताचव्विधर्ताचव्विधारयः ॥ ४ ॥ ऋतजिच्च-
सत्यजिच्चसेनजिच्चसुषेणश्च ॥ अन्तिमित्रश्चदूरेऽअमित्रश्चगणः ॥ ५ ॥ ईदृ-
क्षासऽएतादृक्षासऽऊषुणः सदृक्षासःप्रतिसदृक्षासऽएतन ॥ मितासश्चसम्मिता-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सोनो ऽग्रद्यसभरसोमरुतोयज्ञे ऽग्रस्मिन् ॥ ६ ॥ स्वतवांश्चप्रघासीचसान्तपन-
ग्रा. शा. श्चगृहमेधीच ॥ क्रीडीचशाकीचोज्जेषि ॥ ७ ॥ इन्द्रन्दैवीर्व्विशोमरुतोनुवर्त्मानो-
॥ ३२ ॥ भवन्यथेन्द्रं दैवीर्व्विशोमरुतोनुवर्त्मानोभवन् ॥ एवमिमञ्यजमानन्दैवीश्चव्वि-
शोमानुषीश्चानुवर्त्मानोभवन्तु ॥ ८ ॥ इम ६. स्तनमूर्ज्जस्वन्तन्धयापाम्प्रपी-
नमग्नेसरिरस्यमध्ये ॥ उत्सञ्जुषस्वमधुमन्तमर्व्वन्त्समुद्रिय ६. सदनमाव्विश-
स्व ॥ ६ ॥ घृतम्मिमिक्षेघृतमस्य० ॥ १ ॥ वसोः प० क्षः स्वाहा ॥ ततोऽग्निंप्रद-
क्षिणीकृत्यपश्चिमदेशेप्राङ्मुखोपविश्य ॥ ततः स्रुवेणभस्ममानीय ॐ त्र्यायुषंजम-
दग्नेः इति ललाटे । कश्यपस्यत्र्यायुषम् । इति ग्रीवायां । यद्देवेषुत्र्यायुषं इति दक्षि-
णांशे ॥ तन्नोऽ अस्तुत्र्यायुषामिति हृदि । संस्रवप्राशनं । ग्राचमनं । पवित्राभ्यांमार्जनं । रामः
अग्नौपवित्रः प्रतिपत्तिः ॥ ब्रह्मणे पूर्णपात्रदानं ॥ कृतस्य ग्रहशान्ति होमकर्मणों गत- ॥ ३२ ॥
याविहितं इदं पूर्णपात्रं स दक्षिणं ब्रह्मणेतुभ्यमहंसंप्रददे ॥ ॐ द्यौस्त्वाददातु पृथि-
वीत्वाप्रतिगृह्णातु ॥ अग्नेपश्चात्प्रणीताविमोकः ॥ ॐ ग्रापः शिवाः शिवतमाः शां-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ताः शान्ततमास्तास्तेकृण्वं तुभेषजं उपयमनकुशैर्मार्जयेत् ॥ उपयमनकुशानामग्नौ-
प्रक्षेपः ॥ ततः श्रेयःसंपाद्यदानं ॥ अद्येत्यादिकृतस्यग्रहशांत्याख्यस्यकर्मणः यजमा-
नायश्रेयोदानं करिष्ये ॥ तत्रादौ वचः प्रतिवचनम् । शिवाआपःसन्तु ॥ सन्तु-
शिवाआपः ॥ सौमनस्यमस्तु ॥ अस्तुसौमनस्यं ॥ अक्षतंचारिष्टं चास्तु ॥ अस्त्वक्ष-
तमरिष्टं च ॥ यजमानहस्तेगंधादिदानं ॥ गन्धाः पांतु ॥ सुमंगल्यंचास्तु ॥ अक्षताः
पान्तु ॥ आयुष्यमस्तु ॥ पुष्पाणिपान्तु ॥ सौश्रियमस्तु ॥ यत्पापंरोगं अशुभंअकल्याणं
तद्दूरेप्रतिहतमस्तु ॥ यच्छ्रेयस्तदस्तु । भवन्नियोगेनमयाअस्मिन्ग्रहशान्त्याख्येकर्म-
णियत्कृतं आचार्यत्वंतदुत्पन्नं श्रेयः तत् अमुनासाक्षतेनसजलेनपूगीफलेनतुभ्यमहं
संप्रददे ॥ प्रतिगृह्यतां ॥ प्रतिगृह्णामि ॥ तेनश्रेयसात्वंश्रेयोवान्भव ॥ यजमानःभवा-
मीतितेनवाच्यं ॥ एवमेवब्रह्मादयोऋत्विजोजापकादयश्च ॥ यद्वा ॥ ब्रह्मादयोऋत्वि-
जोजापकाश्चआचार्यद्वाराश्रेयोदानं कुर्युः ॥ तद्यथा ॥ भवन्नियोगेनमयाअस्मिन्
ग्रहशांत्याख्येकर्मणियत्कृतं आचार्यत्वं मयापरिवारभूतैः सहयत्कृतंब्रह्मत्वं गाणा-
CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पत्यत्वंसादस्यत्वंतथाचयः कृतोजपः आचार्यत्वात् ब्रह्मत्वात् गाणपत्यत्वात् साद-
स्यत्वात् जापकत्वात् यदुत्पन्नंश्रेयः तत् अमुनासाक्षतेनसजलेनपूगीफलेनतुभ्य-
महंसंप्रददे॥ तेनश्रेयसात्वं श्रेयोवान्भव ॥ भवामीतितेनवाच्यं ॥ ततोआचार्यादीन्
गन्धवस्त्रालंकारादिभिर्यथाविभवंपूजयेत् ॥ आचार्यादिभ्योब्राह्मणेभ्योदक्षिणां-
दद्यात् तत्रक्रमः॥ आचार्यायगां ॥१॥ ब्रह्मणेवृषभं ॥ २ ॥ सदस्यायअश्वं ॥ ३ ॥
ऋत्विग्भ्योसुवर्णंदद्यात् ॥४॥ कृतस्यग्रहशान्तिकर्मणः सांगतासिध्यर्थं तत्संपूर्ण-
फलप्राप्त्यर्थंइदंगोनिष्क्रयभूतंद्रव्यंअमुकगोत्रायअमुकशर्मणेब्राह्मणायआचार्याय-
तुभ्यमहंसंप्रददे । ॐ स्वस्तीतिपठेत् ॥१॥ कृ० इदं वृषनिष्क्रयभूतं द्रव्यंय० ॥२॥
कृ० इदंसदस्यायअश्वनिष्क्रयभू० ॥३॥ कृ० इदंऋत्विग्भ्यः सुवर्णनिष्क्रयभू० ॥४॥
ततो ब्राह्मणभोजनसंकल्पंकुर्यात् ॥ कृतस्य० ग्रहशां०कर्म०यथासंख्यकान्ब्राह्मणान्
यथाकालेयथोत्पन्नेनान्नेनाहंभोजयिष्ये ॥ भोजनांतेतेभ्यः ताम्बूलदक्षिणांचदास्ये॥
ततो ग्रहपीठदेवतानां गन्धादिपंचोपचारैरुत्तरपूजनं ॥ अवाहितदेवताभ्योनमः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आचार्यायप्रधानपीठंदद्यात्॥ कृ० थं इदं ग्रहपीठंमातृकापीठंसोपस्करंदक्षिणासहितं आचार्यायतु० ॥ ततोरुद्रकलशदेवतान्तरकलशोदकमेकस्मिन्पात्रेकृत्वादूर्वापंचपल्लवैरुदङ्मुखआचार्यस्तिष्ठन् चत्वारोऋत्विजश्चसकुटुम्बंसपत्नीकंयजमानं प्राङ्मुखमुपविष्टमभिषिंचेयुः॥तत्रमन्त्राःदेवस्यत्वा०॥ सरस्वत्यैवाचोयन्तुर्यंत्रियेदधामिबृहस्पतेष्ट्वासाम्राज्येनाभिषिंचाम्यसौ॥१॥ देवस्यत्वा०॥ सरस्वत्यैवाचोयंतुर्यंत्रेणाग्नेः साम्राज्येनाभिषिंचामि ॥ २ ॥ देवस्यत्वा० ॥ अश्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिंचामिसरस्वत्यैभैषज्येनवीर्यायान्नाद्यायाभिषिंचामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेभिषिंचामि ॥ ३ ॥ ॐ सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः॥ वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः ॥१॥ प्रद्युम्नश्चानिरुद्धश्चभवन्तुविजयायते ॥ आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा॥ २ ॥ वरुणः पवनश्चैवधनाध्यक्षस्तथाशिवः ॥ ब्रह्मणासहिताः सर्वेदिक्पालाः पांतुतेसदा ॥ ३ ॥ कीर्तिर्लक्ष्मिर्धृतिर्मेधापुष्टिः श्रद्धाक्रियामतिः ॥ बुद्धिर्लज्जावपुःशान्तिःकान्ति-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

स्तुष्टिश्वमातरः ॥ ४ ॥ एतास्त्वामाभिषिंचन्तुदेवपत्न्यः समागताः ॥ आदि-
त्यश्चन्द्रमाभौमोबुधजीवसितार्कजाः ॥ ५ ॥ ग्रहास्त्वामभिषिंचन्तुराहुः के-
तुश्चतर्पिताः ॥ देवदानवगन्धर्वायक्षराक्षसपन्नगाः ॥ ६ ॥ ऋषयोमनवोगावो-
देवमातरएवच ॥ देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः ॥ ७ ॥ अस्त्रा-
णिसर्वशस्त्राणिराजानोबाहनानिच ॥ औषधानिचरत्नानिकालस्यावयवाश्च-
ये ॥ ८ ॥ सरितःसागराः शैलास्तीर्थानिजलदानदाः ॥ एतेस्त्वामभिषिं-
चन्तुधर्मकामार्थसिद्धये ॥ ९ ॥ अमृताभिषेकोस्तु॥शान्तिः पुष्टिस्तुष्टिश्चास्तु॥
अन्येभ्योब्राह्मणेभ्योयथाशक्तिभूयसींदक्षिणांदद्यात् ॥ कृ०थं तन्मध्येन्यूनातिरि-
क्तदोषपरिहारार्थंनानागोत्रेभ्योनानाशर्मभ्योब्राह्मणेभ्यःसमाश्रितबंधुवर्गेभ्योदी-
नानाथेभ्यश्चयथोत्साहांभूयसींदक्षिणांविभज्यदातुमहमुत्सृजे ॥ ततोदेवता-
ग्निसानुनयांविसृज्य ॥ ॐ उत्तिष्ठब्रह्मणस्पतेदेवयन्तस्त्वेमहे ॥ उपप्रयंतुमरुतः
सुदानवइन्द्रप्राशूर्भवासचा ॥ यान्तुदेवगणाः सर्वेपूजामादायमामकीं ॥ इष्टका-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मसमृध्यर्थंपुनरागमनायच॥आवाहितदेवताः स्वस्थानेगच्छत॥१॥ ॐ यज्ञयज्ञं-
गच्छयज्ञपतिंगच्छस्वांयोनिंगच्छस्वाहा॥ एषतेयज्ञोयज्ञपतेसहसूक्तवाकः सर्ववीर-
स्तञ्जुषस्वस्वाहा। गच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर॥यत्रब्रह्मादयोदेवास्तत्रग-
च्छहुताशन ॥यज्ञनारायणस्वस्थानेगच्छ ॥ २॥ ॐ चतुर्भिश्चचतुर्भिश्चद्वाभ्यां
पञ्चभिरेवच ॥ हूयतेचपुनर्द्वाभ्यां तस्मैयज्ञात्मनेनमः ॥ मयायत्कृतं यथाकालं
यथादेशंयथाज्ञानंयथाशक्तिग्रहयज्ञाख्यंकर्मतेनश्रीपरमेश्वरःप्रीयतां ॥ ॐ तत्स-
तूब्रह्मार्पणमस्तु॥ सकुशजलंभूमौक्षिपेत् ॥ करौसंपुटीकृत्य ॥ मयायत्कृतंग्रह-
यज्ञाख्यंकर्मतत्कालहीनं भक्तिहीनं शक्तिहीनं श्रद्धाहीनं भवतांब्राह्मणानांवच-
नात् श्रीसूर्याद्यावाहितदेवताप्रसादात्सर्वंविधेःपरिपूर्णमस्त्वितिभवन्तोब्रुवन्तु ॥
अस्तुपरिपूर्णं इतिब्राह्मणाःवदेयुः ॥ जपच्छिद्रंतपच्छिद्रंयच्छिद्रंशान्तिकर्मणि ॥
सर्वं भवतु मेऽच्छिद्रंब्राह्मणानांप्रसादतः॥ प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् ॥
स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः॥यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रिया-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दिशु। न्यूनंसंपूर्णतांया तुसद्द्योवंदेतमच्युतं ॥ ॐ विष्णवेनमः ॥३॥ ततो तिलका-
शीर्वादः। श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ॥ धान्यं धनं पशुंवहु-
पुत्रलाभं शत्सं वत्सरं दीर्घमायुः ॥ मन्त्रार्थाः सफलाः संतुपूर्णाः संतुमनोरथाः ॥
शत्रूणां बुद्धिनाशोस्तुमित्राणामुदयस्तव ॥ ब्राह्मणान् भोजयित्वादीनानाथां-
श्चान्नादिना सन्तोष्यस्वयंसुहृन्मित्रादियुतः सोत्साहः सन्तुष्टोहविष्यं भुंजीतेति-
शिवम् ॥

इति श्री मन्मालवीयवेणीराम मिश्रात्मज योगेश्वर मिश्र कृतोग्रहयज्ञप्रयोगस्समाप्तः ॥

श्रीगणेशाय नमः ॥ अथ सर्वतोभद्रलिङ्गतोभद्रकारिका ॥ प्रागुदीच्यांगता रेखाः कुर्यादेकोनविंशतिं ॥ खण्डे-
न्दुस्त्रिपदः कोणेश्शृंखलापञ्चभिःपदैः ॥ १ ॥ एकादशपदावल्लीभद्रन्तुनवभिःपदैः ॥ चतुर्विंशत्पदावापीपरिधिर्विं-
शतिः पदैः ॥२॥ मध्येषोडशभिः कोष्ठैःपद्ममष्टदलंस्मृतं ॥ श्वेतेन्दुःशृंखलाकृष्णावल्लीनीलेनपूरयेत् ॥ ३ ॥ भ-
द्रारुणासितावापीपरिधिः पीतवर्णकः ॥ वाह्यान्तरदलः श्वेताकर्णिकापीतवर्णिका ॥४॥ परिध्यावेष्टितंपद्मंवाह्ये-
सत्वंरजस्तमः ॥ तन्मध्येस्थापयेद्देवान्ब्रह्मादींश्च सुरेश्वरान् ॥५॥ इति सर्वतो भद्रं ॥ अथ लिङ्गतोभद्रं ॥ रेखास्त्व-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ष्टादशप्रोक्ताश्चतुर्लिङ्गसमुद्भवे ॥ कोणेन्दुस्त्रिपदः श्वेतस्त्रिपदैः कृष्णशृंखलाः ॥१॥ वल्लीसप्तपदानीलाभद्रंरक्तंचतुष्पदं ॥ भद्र पार्श्वेमहारुद्रंकृष्णमष्टादशैःपदैः ॥ २ ॥ शिवस्यपार्श्वतोवापींकुर्यात्पञ्चपदांसितां ॥ पदमेकंतथापीतंभद्रवाप्योस्तुमध्यतः ॥ ३ ॥ शिरसिशृंखलायाश्चकुर्यात्पीतंपदत्रयं ॥ लिङ्गानांस्कन्धतःकोष्ठाविंशतिरक्तवर्णकाः ॥ ४ ॥ परिधिःपीतवर्णैःस्तुपदैःषोडशभिःस्मृतः ॥ पदैस्तुनवभिःपश्चाद्रक्तंपद्मंसकर्णिकं ॥५॥ इतिलिंगतोभद्रं ॥ तत्रपञ्चवर्णान्युक्तानिपञ्चरात्रे ॥ रजांसिपञ्चवर्णानिमण्डलार्थेहिकारयेत् ॥ शालितण्डुलचूर्णेनशुल्कंवायवसम्भवं ॥ १ ॥ रक्तंकुसुम्भसिन्दूरंगैरिकादिसमुद्भवं ॥ हरितालोद्भवंपीतंरजनीसम्भवंक्वचित् ॥ २ ॥ कृष्णंदग्धैर्यवैःकार्यंहरितंबिल्वचूर्णकं ॥ कारयेत्सर्वधान्यैर्वावर्णकैरुपशोभितं ॥ ३ ॥ अथभद्रेदेवतास्थापन क्रमः ॥ साचार्योयजमानःसर्वतोभद्रमण्डलसमीपेउपविश्य आचम्य ३ प्राणानायम्य ॥ मध्येकर्णिकायां ॐ ब्रह्मणेनमः ब्रह्माणंआवाहयामिस्थापयामि ॥१॥ एवमग्रेपिउत्तरेवाप्यां ॐ सोमाय० सोमं० ॥ २॥ ईशान्यांखण्डेन्दौ ॐ ईशानाय० ईशानं० ॥ ३ ॥ पूर्ववाप्यां ॐ इन्द्राय० इन्द्रं० ॥ ४ ॥ आग्नेयांखण्डेन्दौ ॐ अग्नये० अग्निं० ॥५॥ दक्षिणेवाप्यां ॐ यमाय० यमं० ॥६॥ नैर्ऋत्यांखण्डेन्दौ ॐ निर्ऋतये० निर्ऋतिं० ॥७॥ पश्चिमेवाप्यां ॐ वरुणाय० वरुणं०॥८॥ वायव्यांखण्डेन्दौ ॐ वायवे० वायुं०॥९॥ वायुसोममध्येभद्रेलिङ्गेवा ॐ अष्टवसुभ्यो० अष्टव०॥१०॥सोमेशानमध्येभद्रेलिङ्गे ॐ एकादशरुद्रेभ्यो० एकादशरु० ॥ ११ ॥ इशानेन्द्रमध्ये ॐ द्वादशादित्येभ्यो० द्वादशादि० ॥१२॥ इन्द्राग्न्योर्मध्येभद्रेलिङ्गे ॐ अश्विभ्यां० अश्विनौ० ॥१३॥ अग्नियममध्येभद्रेलिङ्गे ॐ सपैतृकविश्वेभ्योदेवे० सपैतृकविश्वान्देवा० ॥१४॥ यमनिर्ऋतिमध्येभद्रेलिङ्गे ॐ सप्तयक्षेभ्यो० सप्तयक्षा० ॥१५॥ निर्ऋतिवरुणमध्येभद्रेलिङ्गे ॐ भूतनागेभ्यो० भूतनागा० ॥१६॥ वरुणवायुमध्येभद्रेलिङ्गे ॐ गन्धर्वाप्सरोभ्यो० गन्धर्वाप्सरसः०॥१७॥ ब्रह्मसोममध्येलिङ्गेवाप्यां ॐ स्कन्दाय० स्कन्दं० ॥ १८ ॥ तदुत्तरे ॐ वृषभाय० वृषभं० ॥१९॥ तदुत्तरे ॐ शूलाय० शूलं० ॥२०॥ तत्रैव ॐ महाकालाय० महाकालं० ॥२१॥ ब्रह्मेशानमध्येशृंखलायां ॐ दक्षादिसप्तगणेभ्यो० दक्षादिसप्तगणा० ॥ २२ ॥ ब्रह्मेन्द्रमध्येवाप्यां ॐ दुर्गायै० दुर्गां ॥ २३ ॥ तत्पूर्वे ॐ विष्णवे०

CC-0 Jangamwadi Math Collection. Digitized by eGangotri

विष्णुं० ॥ २४ ॥ ब्रह्माग्निमध्येशृंखलायां ॐ स्वधायै० स्वधां० ॥ २५ ॥ ब्रह्मयममध्येवाप्यां ॐ मृत्युरोगेभ्यो०
अ. शा. मृत्युरोगा० ॥ २६ ॥ ब्रह्मनिर्ऋतिमध्येशृंखलायां ॐ गणपतये० गणप० ॥ २७ ॥ ब्रह्मवरुणमध्येवाप्यां ॐ अ-
द्भ्यो० अपःआ० ॥ २८ ॥ ब्रह्मवायुमध्येशृंखलायां ॐ मरुद्भ्यो० मरुतःआ० ॥ २९ ॥ ब्रह्मणःपादमूलेकर्णिकाधः
॥ ३६ ॥ मध्यएव ॐ पृथिव्यै० पृथिवीं० ॥३०॥ तत्रैव ॐ गङ्गादिनदीभ्यो० गङ्गादिनदीःआ० ॥३१॥ तत्रैव ॐ सप्तसाग-
रेभ्यो० सप्तसागरा० ॥ ३२ ॥ तदुपरिकर्णिकापरिधौ ॐ मेरवे० मेरुं० ॥ ३३ ॥ बाह्यपरिधौसोमसमीपे ॐ ग-
दायै० गदां० ॥ ३४ ॥ ईशानांतिके ॐ त्रिशूलाय० त्रिशूलं ॥ ३५ ॥ इन्द्रान्तिके ॐ वज्राय० वज्रं० ॥ ३६ ॥
अग्निसमीपे ॐ शक्तये० शक्तिं० ॥ ३७ ॥ यमान्तिके ॐ दण्डाय० दण्डं० ॥ ३८ ॥ निर्ऋतिसमीपे ॐ खड्गाय०
खड्गं० ॥ ३९ ॥ वरुणांतिके ॐ पाशाय० पाशं० ॥ ४० ॥ वायुसमीपे ॐ अङ्कुशाय० अङ्कुशं० ॥ ४१ ॥ तद्बाह्ये-
उत्तरे ॐ गौतमाय० गौतमं० ॥ ४२ ॥ ईशान्ये ॐ भरद्वाजाय० भरद्वाजं० ॥४३॥ पूर्वे ॐ विश्वामित्राय० वि-
श्वामित्रं ॥ ४४ ॥ आग्नेयां ॐ कश्यपाय० कश्यपं० ॥ ४५ ॥ दक्षिणे ॐ जमदग्नये० जमदग्निं ॥ ४६ ॥ नैर्ऋत्यां
ॐ वसिष्ठाय० वसिष्ठं० ॥ ४७ ॥ पश्चिमेअत्रये० अत्रिं० ॥ ४८ ॥ वायव्यां ॐ अरुन्धत्यै० अरुन्धतीं० ॥ ४९ ॥
तद्बाह्ये पूर्वादि क्रमेण ॐ ऐन्द्र्यै० ऐन्द्रीं ॥ ५० ॥ ॐ कौमार्यै० कौमारीं० ॥ ५१ ॥ ॐ ब्राह्म्यै० ब्राह्मीं ॥ ५२ ॥
ॐ वाराह्यै० वाराहीं ॥ ५३ ॥ ॐ चामुण्डायै० चामुण्डां० ॥ ५४ ॥ ॐ वैष्णव्यै०वैष्णवीं ॥ ५५ ॥ ॐ माहेश्वर्यै०
माहेश्वरीं० ॥ ५६ ॥ ॐ वैनायक्यै० वैनायकीं० ॥ ५७ ॥ इतिरुद्रकल्पद्रुमाद्यनुसारीसर्वतोभद्रदेवताः ॥ अ०
लिं० भ० देवताविशेषः ॥ तद्बाह्येपूर्वेअसिताङ्गभैरवाय० असिताङ्गभैरवं० ॥ १ ॥ आग्नेय्यांरुरुभैरवाय० रुरुभै-
रवं० ॥ २ ॥ दक्षिणे ॐ चण्डभैरवाय० चण्डभैरवं० ॥ ३ ॥ नैर्ऋत्यां ॐ क्रोधभैरवाय० क्रोधभैरवं० ॥ ४ ॥ रामः
पश्चिमे ॐ उन्मत्तभैरवाय० उन्मत्तभैरवं ॥ ५ ॥ वायव्यां ॐ कपालभैरवाय० कपालभैरवं ॥ ६ ॥ उत्तरे
ॐ भीषणभैरवाय० भीषणभैरवं० ॥ ७ ॥ ईशान्यां ॐ संहारभैरवाय० संहारभैरवं ॥ ८ ॥ तद्बाह्ये- ॥ ३६ ॥
पूर्वादिक्रमेण ॐ भवाय० भवं० ॥ ९ ॥ ॐ शर्वाय० शर्वं० ॥ १० ॥ ॐ पशुपतये० पशुपतिं ॥ ११ ॐ ईशा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नाय० ईशानं ॥ १२ ॥ ॐ रुद्राय० रुद्रं० ॥ १३ ॥ ॐ उग्राय० उग्रं ॥ १४ ॥ ॐ भीमाय० भीमं ॥ १५ ॥ ओँ महते० महांतं ॥ १६ ॥ ॐ अनंताय० अनंतं ॥ १७ ॥ ॐ वासुकये० वासुकिं ॥ १८ ॥ ॐ तक्षकाय० तक्षकं ॥ १९ ॥ ॐ कुलिशाय० कुलिशं ॥ २० ॥ ॐ कर्कोटकाय ० कर्कोटकं ॥ २१ ॥ ॐ शंखपालाय० शंखपालं ॥ २२ ॥ ॐ कंबलाय० कंबलं ॥ २३ ॥ ॐ अश्वतराय० अश्वतरं ॥ २४ ॥ ईशानेन्द्रयोर्मध्ये ओं शूलाय० शूलं ॥ २५ ॥ इन्द्राग्न्योर्मध्ये० ओं चन्द्रमौलिने० चंद्रमौलिनं० ॥ २६ ॥ अग्नियमयोर्मध्येचन्द्रमसे० चन्द्रमसं० ॥ २७ ॥ यमनिर्ऋतिमध्ये ओं वृषभध्वजाय० वृषभध्वजं ॥ २८ ॥ निर्ऋतिवरुणयोर्मध्ये त्रिलोचनाय० त्रिलोचनं ॥ २९ ॥ वरुणवायुमध्ये ओँ शक्तिधराय० शक्तिधरं० ॥ ३० ॥ वायुसोमयोर्मध्ये ओँ महेश्वराय० महेश्वरं० ॥ ३१ ॥ सोमेशानयोर्मध्ये ओँ शूलपाणये० शूलपाणिं० ॥३२॥ इतिलिं० भ० दे० ॥ अथप्रतिमासुअग्न्युत्तारणविधिः ॥ आचार्यः पात्रान्तरेप्रतिमांनिधायघृतेनाभ्यज्य ॥ उपरिजलधारांकुर्यात् ॥ तत्रमन्त्राः ओँ समुद्रस्यत्वा ॥ १ ॥ हिमस्यत्वा ॥ २ ॥ उपज्मन्नु० ॥ ३ ॥ अपामिदन्य० ॥ ४ ॥ अग्नेपावक० ॥ ५ ॥ सनःपावकदी० ॥ ६ ॥ पावकयाय० ॥ ७ ॥ नमस्तेहरसे० ॥ ८ ॥ नृषदे० ॥ ९ ॥ येदेवादेवानां० ॥१०॥ येदेवेष्वधि० ॥११॥ प्राणदा० ॥१२॥ अथप्राणप्रतिष्ठांकृत्वा प्रतिमांहस्तेन संस्पृश्यवीजमन्त्रान्जपेत् ॥ ॐ आँ ह्रीँ क्रौँ यं रं लं वं शं षं सं हं सः अस्यप्राणइहप्राणाः ॥ पुनः आँ ह्रीँ० सः।० अस्य जीवइहस्थितः ॥ एवमग्रेपि सर्वेन्द्रियाणि वाङ्मनस्त्वक् चक्षुश्रोत्रजिह्वाघ्राणप्राणाः इहागत्यस्वस्तयेसुखंचिरंतिष्ठन्तुस्वाहा ॥ अस्यैप्राणाः प्रतिष्ठंतुअस्यैप्राणाः क्षरंतु च ॥ अस्यैदेवत्वमर्चायैमामहेतिकश्चन ॥ इतिप्राणप्रतिष्ठांकृत्वाप्रतिमांपूजयेत् ॥ इति अग्न्युत्तारणविधिः समाप्तः ॥

सम्वत् १९५८ कार्तिक कृष्ण ११ गुरौ शुद्ध यन्त्रेप्रकाशितमितिशिवं ॥

काशी— [illegible] यन्त्रालय में मुद्रित हुआ ।

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

॥ इतिसमंत्रकग्रहशांतिप्रयोग समाप्तः ॥

॥ प्रथमावृत्ति १००० ॥

CC-0 Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0 JangamwadiMath Collection. Digitized by eGangotri